
02.21.2015 2

# TABLE OF CONTENTS


गुरुपरम्पराश्लोकम् ........................................................ 5
सिद्धकुञ्जिकास्तोत्रम्........................................................ 6
देवी कवचम् ........................................................ 8
अर्गलास्तोत्रम् ........................................................ 16
कीलकम् ........................................................ 20
तन्त्रोक्त रात्रिसूक्तम्........................................................ 23
नवार्ण जपः (पूर्वार्धः) ........................................................ 25
ध्यानम् ........................................................ 26
नवाक्षरी जपम् ........................................................ 27
नवाक्षरी जप होमम्........................................................ 27
सप्तशती न्यासः ........................................................ 28
ध्यानम् ........................................................ 30
सप्तशति न्यास होमम् ........................................................ 31
प्रथमोध्यायः ........................................................ 32
द्वितीयोध्यायः........................................................ 47
तृतीयोध्यायः........................................................ 59
चतुर्थोध्यायः ........................................................ 67
पञ्चमोध्यायः ........................................................ 76
षष्ठोध्यायः ........................................................ 95
सप्तमोध्यायः ........................................................ 100
अष्टमोध्यायः ........................................................ 105

नवमोध्यायः ........................................................ 117
दशमोध्यायः ........................................................ 124
एकादशोध्यायः ........................................................ 130
द्वादशोध्यायः ........................................................ 141
त्रयोदशोध्यायः ........................................................ 149
सप्तशती न्यासम् ........................................................ 153
ध्यानम् ........................................................ 154
नवाक्षरी जपः॥ (अपरार्धः) ........................................................ 155
नवाक्षरी जपहोमः॥ (अपरार्धः) ........................................................ 155
ध्यानम् ........................................................ 156
तन्त्रोक्त देवी सूक्तम्........................................................ 157
प्राधानिकं रहस्यम् ........................................................ 161
वैकृतिकं रहस्यम् ........................................................ 166
मूर्तिरहस्यम् ........................................................ 171
क्षमा प्रार्थना........................................................ 175

ॐ

शुक्लांबरधरं विष्णुं शशिवर्णं चतुर्भुजं।
प्रसन्न वदनं ध्यायेत् सर्व विघ्नोपशान्तये॥

गुरुर्-ब्रह्मा गुरुर्-विष्णुर्-गुरुर्-देवो महेश्वरः।
गुरुस्-साक्षात् परं ब्रह्म तस्मै श्रीगुरवे नमः॥

## गुरुपरम्पराश्लोकम्

श्री विमर्शा-नन्द-नाथम् सत्याम्बा सहितम् गुरुम्।
हृद् पद्म कर्णिका-मध्ये भावयेत् सर्व सिद्धये॥

श्री प्रकाशा-नन्द-नाथम् विमर्शाम्बा-युतम् गुरुम्।
हृद्-पद्म-कर्णिका-मध्ये भावयेत् सर्व सिद्धये॥

श्री रामा-नन्द-नाथम् रामाम्बा-सहितम् गुरुम्।
हृद् पद्म कर्णिका-मध्ये भावयेत् सर्व सिद्धये॥

# सिद्धकुञ्जिकास्तोत्रम्

ॐ शिव उवाच॥ १॥

श्रृणु देवि प्रवक्ष्यामि कुञ्जिका-स्तोत्र-मुत्तमम्।
येन मन्त्र-प्रभावेण चण्डी-जापश् शुभो भवेत् ॥ २॥

न कवचं नार्गलास् स्तोत्रं कीलकं न रहस्यकम्।
न सूक्तं नापि ध्यानं च न न्यासो न च वार्चनम् ॥ ३॥

कुञ्जिका-पाठ मात्रेण दुर्गा-पाठ-फलं लभेत्।
अति-गुह्यतरं देवि देवानामपि दुर्लभम् ॥ ४॥

गोपनीयं प्रयत्नेन स्वयो-निरिव पार्वति।
मारणं मोहनं वश्यं स्तम्भनोच्-चाटनादिकम्
पाठ-मात्रेण संसिद्-ध्येत् कुञ्जिका-स्तोत्र-मुत्तमम् ॥

ॐ ऐं ह्रीं क्लीं चामुण्डायै विच्चे ॥
ॐ ग्लौं हुं क्लीं जूं सः ज्वालय ज्वालय
ज्वल ज्वल प्रज्वल प्रज्वल
ऐं ह्रीं क्लीं चामुण्डायै विच्चे
ज्वल हं सं ळं क्षं फट् स्वाहा ॥ ७॥

नमस्ते रुद्र-रूपिण्यै नमस्ते मधु-मर्दिनि।
नमक् कैटभ-हारिण्यै नमस्ते महिषार्दिनि ॥८॥

नमस्ते शुम्भ-हन्त्र्यै च निशुम्भासुर-घातिनि।
जाग्रतं हि महादेवि जपं सिद्धिम् कुरुष्व मे ॥९॥

ऐंकारी सृष्टि-रूपायै ह्रींकारी प्रति-पालिका।
क्लींकारी काम-रूपिण्यै बीज-रूपे नमोऽस्तुते ॥१०॥

चामुण्डा चण्ड-घाती च यैकारी वर-दायिनी ।
विच्चे  चाभयदा नित्यं नमस्ते मन्त्र-रूपिणि ॥ ११॥

धां धीं धूं धूर्जटेफ् पत्नी वां वीं वूं वाग-धीश्वरी।
क्रां क्रीं क्रूं कालिका देवि शां शीं शूं मे शुभं कुरु ॥ १२॥

हुं हुं हुम्कार-रूपिण्यै जं जं जं जम्भ-नादिनी।
भ्रां भ्रीं भ्रूं भैरवी भद्रे भवान्यै ते नमो नमः ॥ १३॥

अं कं चं टं तं पं यं शं वीं दुं ऐं वीं हं क्षं
धिजाग्रं धिजाग्रं त्रोटय त्रोटय दीप्तं कुरु कुरु स्वाहा ॥  १४॥

पां पीं पूं पार्वती पूर्णा खां खीं खूं खेचरी तथा।

सां सीं सूं सप्तशती देव्या मन्त्र-सिद्धिं कुरुष्व मे ॥१५॥
इदं तु कुञ्जिका स्तोत्रं मन्त्र-जागर्ति-हेतवे।
अभक्ते नैव दातव्यं गोपितं रक्ष पार्वति ॥१६॥

यस्तु कुञ्जिकया देवि हीनां सप्तशतीं पठेत्।
न तस्य जायते सिद्धि-ररण्ये रोदनं यथा ॥१७॥

## देवी कवचम्

ॐ अस्य श्रीचण्डी-कवचस्य
ब्रह्मा ऋषिः । - Touch top of head with right hand
अनुष्टुप् छन्दः।- Touch the mouth with the right hand
चामुण्डा देवता ।- Touch the heart with right hand
अङ्गन्यासोक्त-मातरो बीजम् । - Touch the right side below chest with right hand
दिग्बन्ध-देवतास्-तत्वम् ।- Touch the left side below chest with right hand
श्रीजगदम्बा-प्रीत्यर्थे सप्तशती पाठाङ्गत्वेन जपे विनियोगः। Perform namaskar mudra

ॐ नमश्चण्डिकायै॥
मार्कण्डेय उवाच॥१॥

यद्-गुह्यं परमं लोके सर्व-रक्षाकरं नृणाम्।

यन्न कस्य-चिदाख्यातं तन्मे ब्रूहि पितामह॥ २॥

ब्रह्मोवाच॥३॥
अस्ति गुह्यतमं विप्र सर्व-भूतोप-कारकम्।
देव्यास्तु कवचं पुण्यं तच्-छृणुष्व महामुने॥ ४॥

प्रथमं शैल-पुत्री च द्वितीयं ब्रह्म-चारिणी।
तृतीयं चन्द्र-घण्टेति कूष्माण्डेति चतुर्थकम्॥ ५॥

पञ्चमं स्कन्द-मातेति षष्ठं कात्यायनीति च।
सप्तमं काल-रात्रीति महा-गौरीति चाष्टमम्॥ ६ ॥

नवमं सिद्धि-दात्री च नवदुर्गाफ् प्रकीर्तिताः।
उक्तान्-येतानि नामानि ब्रह्मणैव महात्मना॥ ७॥

अग्निना दह्य-मानस्तु शत्रु-मध्ये गतो रणे।
विषमे दुर्गमे चैव भयार्त्ताश् शरणं गताः॥ ८॥

न तेषां जायते किञ्चि-दशुभं रण-सङ्कटे।
नापदं तस्य पश्यामि शोक-दुख्-ख-भयं न हि॥९॥

यैस्तु भक्त्या स्मृता नूनं तेषां वृद्धिफ् प्रजायते।
ये त्वां स्मरन्ति देवेशि रक्षसे तान्न संशयः॥१० ॥

प्रेत-संस्था तु चामुण्डा वाराही महिषासना।
ऐन्द्री गज-समारूढा वैष्णवी गरुडासना॥ ११॥

माहेश्वरी वृषारूढा कौमारी शिखि-वाहना।
लक्ष्मीफ् पद्मासना देवी पद्म-हस्ता हरिप्रिया॥ १२॥

श्वेत-रूप-धरा देवी ईश्वरी वृष-वाहना।
ब्राह्मी हंस-समारूढा सर्वा-भरण-भूषिता॥ १३॥

इत्येता मातरस् सर्वास् सर्वयोग-समन्विताः।
नानाभरण-शोभाढ्या नाना-रत्नोप-शोभिताः॥ १४॥

दृश्यन्ते रथमारूढा देव्यक् क्रोध-समाकुलाः।
शङ्खं चक्रं गदां शक्तिं हलं च मुसला-युधम्॥ १५॥

खेटकं तोमरं चैव परशुं पाशमेव च।
कुन्तायुधं त्रिशूलञ्च शार्ङ्ग-मायुध-मुत्तमम्॥ १६॥

दैत्यानां देह-नाशाय भक्तानामभयाय च।

धारयन्त्या-युधा-नीत्थं देवानां च हिताय वै॥१७॥

नमस्तेऽस्तु महारौद्रे महाघोर-पराक्रमे।
महाबले महोत्साहे महाभय-विनाशिनि॥ १८॥

त्राहि मां देवि दुष्-प्रेक्ष्ये शत्रूणां भय-वर्धिनि।
प्राच्यां रक्षतु मामैन्द्री आग्नेय्या-मग्नि-देवता॥ १९

दक्षिणेऽवतु वाराही नैर्ऋत्यां खड्ग-धारिणी।
प्रतीच्यां वारुणी रक्षेद् वायव्यां मृगवाहिनी॥ २०॥

उदीच्यां पातु कौमारी ऐशान्यां शूल-धारिणी।
ऊर्ध्वं ब्रह्माणि मे रक्षे-दधस्ताद् वैष्णवी तथा॥ २१॥

एवं दश दिशो रक्षेच्-चामुण्डा शव-वाहना।
जया मे चाग्रतफ् पातु विजया पातु पृष्ठतः॥२२॥

अजिता वाम-पार्श्वे तु दक्षिणे चापराजिता।
शिखा-मुद्योतिनी रक्षेद्- उमा मूर्ध्नि व्यवस्थिता ॥२३॥

मालाधरी ललाटे च भ्रुवौ रक्षेद् यशस्विनी ।
त्रिनेत्रा च भ्रुवोर्-मध्ये यमघण्टा च नासिके॥ २४॥

शङ्खिनी चक्षुषोर्-मध्ये श्रोत्रयोर्-द्वार-वासिनी।
कपोलौ कालिका रक्षेत् कर्णमूले तु शाङ्करी॥ २५॥

नासिकायां सुगन्धा च उत्तरोष्ठे च चर्चिका।
अधरे चामृत-कला जिह्वायां च सरस्वती॥ २६॥

दन्तान् रक्षतु कौमारी कण्ठदेशे तु चण्डिका।
घण्टिकां चित्रघण्टा च महामाया च तालुके॥ २७॥

कामाक्षी चिबुकं रक्षेद् वाचं मे सर्वमङ्गला।
ग्रीवायां भद्रकाली च पृष्ठ-वंशे धनुर्धरी॥ २८॥

नीलग्रीवा बहिक् कण्ठे नलिकां नल-कूबरी।
स्कन्धयोख् खड्गिनी रक्षेद् बाहू मे वज्र-धारिणी॥ २९॥

हस्तयोर्-दण्डिनी रक्षेदम्बिका चाङ्गुलीषु च।
नखान्-छूलेश्वरी रक्षेत्-कुक्षौ रक्षेत् कुलेश्वरी॥ ३०॥

स्तनौ रक्षेन्-महादेवी मनश् शोक-विनाशिनी।
हृदये ललिता देवी उदरे शूल-धारिणी॥ ३१॥

नाभौ च कामिनी रक्षेद् गुह्यं गुह्येश्वरी तथा।

पूतना कामिका मेढ्रं गुदे महिष-वाहिनी॥ ३२ ॥

कट्यां भगवती रक्षेज्-जानुनी विन्ध्य-वासिनी।
जङ्घे महाबला रक्षेत्-सर्वकाम-प्रदायिनी ॥ ३३॥

गुल्फयोर्-नारसिंही च पादपृष्ठे तु तैजसी।
पादाङ्गुलीषु श्री रक्षेत्-पादाधस्-तल-वासिनी ॥३४॥

नखान् दंष्ट्रा-कराली च केशांश्-चैवोर्ध्व-केशिनी।
रोम-कूपेषु कौबेरी त्वचं वागीश्वरी तथा॥ ३५॥

रक्त-मज्जाव-सामांसान्-यस्थि-मेदांसि पार्वती।
अन्त्राणि काल-रात्रिश्च पित्तं च मुकुटेश्वरी॥३६॥

पद्मावती पद्म-कोशे कफे चूडामणिस्-तथा।
ज्वाला-मुखी नखज्वाला-मभेद्या सर्व-सन्धिषु॥ ३७ ॥

शुक्रं ब्रह्माणि मे रक्षेच्-छायां छत्रेश्वरी तथा।
अहङ्कारं मनो बुद्धिं रक्षेन्मे धर्म-धारिणी॥ ३८॥

प्राणा-पानौ तथा व्यान-मुदानं च समानकम्।
वज्र-हस्ता च मे रक्षेत् प्राणं कल्याण-शोभना॥३९॥

रसे रूपे च गन्धे च शब्दे स्पर्शे च योगिनी।
सत्वं रजस्-तमश्चैव रक्षेन्-नारायणी सदा॥४०॥

आयू रक्षतु वाराही धर्मं रक्षतु वैष्णवी।
यशक् कीर्तिं च लक्ष्मीं च धनं विद्यां च चक्रिणी॥ ४१॥

गोत्रमिन्द्राणि मे रक्षेत्-पशून्मे रक्ष चण्डिके ।
पुत्रान् रक्षेन्-महालक्ष्मीर्-भार्यां रक्षतु भैरवी॥ ४२॥

पन्थानं सुपथा रक्षेन्-मार्गं क्षेमकरी तथा।
राजद्वारे महालक्ष्मीर्-विजया सर्वतस् स्थिता॥ ४३॥

रक्षाहीनं तु यत् स्थानं वर्जितं कवचेन तु।
तत्सर्वं रक्ष मे देवि जयन्ती पापनाशिनी॥४४॥

पदमेकं न गच्छेत् तु यदीच्-छेच्-छु-भमात्मनः।
कवचेना-वृतो नित्यं यत्र यत्रैव गच्छति॥४५॥

तत्र तत्रार्थ-लाभश्च विजयस् सार्व-कामिकः।
यं यं चिन्तयते कामं तं तं प्राप्नोति निश्चितम्॥४६॥

परमैश्वर्य-मतुलं प्राप्स्यते भूतले पुमान्।

निर्भयो जायते मर्त्यस् सङ्ग्रामेष्-वपराजितः॥ ४७॥

त्रैलोक्ये तु भवेत्-पूज्यक् कवचेना-वृतफ् पुमान्।
इदं तु देव्याक् कवचं देवानामपि दुर्लभम् ॥४८॥

यफ् पठेत् प्रयतो नित्यं त्रिसन्ध्यं श्रद्धयान्वितः।
दैवी कला भवेत्तस्य त्रैलोक्येष्-वपराजितः॥ ४९॥

जीवेद् वर्षशतं साग्र-मप-मृत्यु-विवर्जितः।
नश्यन्ति व्याधयस् सर्वे लूता-विस्फोट-कादयः॥५० ॥

स्थावरं जङ्गमं चैव कृत्रिमं चापि यद् विषम्।
अभि-चाराणि सर्वाणि मन्त्र-यन्त्राणि भूतले॥ ५१॥

भूचराख् खेचराश्-चैव जलजाश्-चोप-देशिकाः।
सहजा कुलजा माला डाकिनी शाकिनी तथा॥५२॥

अन्तरिक्ष-चरा घोरा डाकिन्यश्च महाबलाः।
ग्रहभूत-पिशाचाश्च यक्ष-गन्धर्व-राक्षसाः॥ ५३॥

ब्रह्म-राक्षस-वेतालाक् कूष्माण्डा भैरवादयः।
नश्यन्ति दर्शनात्तस्य कवचे हृदि संस्थिते॥५४॥

मानोन्-नतिर्-भवेद् राज्ञस्-तेजो-वृद्धिकरं परम्।
यशसा वर्धते सोऽपि कीर्ति-मण्डित-भूतले॥५५॥

जपेत्-सप्तशतीं चण्डीं कृत्वा तु कवचं पुरा।
यावद् भूमण्डलं धत्ते सशैल-वनकाननम्॥ ५६॥

तावत्-तिष्ठति मेदिन्यां सन्ततिफ् पुत्र-पौत्रिकी।
देहान्ते परमं स्थानं यत् सुरैरपि दुर्लभम्॥ ५७॥

प्राप्नोति पुरुषो नित्यं महामाया-प्रसादतः।
लभते परमं रूपं शिवेन सह मोदते ॥ॐ ॥

# अर्गलास्तोत्रम्

ॐ अस्य श्री अर्गला-स्तोत्र- महामन्त्रस्य
विष्णुर् ऋषिः। - Touch top of head with right hand
अनुष्टुप् छन्दः। - Touch the mouth with right hand
श्रीमहालक्ष्मीर्-देवता। - Touch the heart with right hand
श्रीजगदम्बा-प्रीतये सप्तशति-पाठाङ्गत्वेन जपे विनियोगः। Perform namaskar mudra

ॐ नमश्चण्डिकायै॥

मार्कण्डेय उवाच॥१॥

जयन्ती मङ्गला काली भद्रकाली कपालिनी।
दुर्गा क्षमा शिवा धात्री स्वाहा स्वधा नमोऽस्तु ते॥ २॥

जय त्वं देवि चामुण्डे जय भूतार्ति-हारिणि।
जय सर्वगते देवि कालरात्रि नमोऽस्तु ते ॥३॥

मधुकैटभ-विद्रावि-विधातृ-वरदे नमः।
रूपं देहि जयं देहि यशो देहि द्विषो जहि॥ ४॥

महिषासुर-निर्णाशि भक्तानां सुखदे नमः।
रूपं देहि जयं देहि यशो देहि द्विषो जहि॥५॥

रक्त-बीज-वधे देवि चण्ड-मुण्ड-विनाशिनि।
रूपं देहि जयं देहि यशो देहि द्विषो जहि॥ ६॥

शुम्भस्यैव निशुम्भस्य धूम्-राक्षस्य च मर्दिनि
रूपं देहि जयं देहि यशो देहि द्विषो जहि॥ ७॥

वन्दि-ताङ्घ्रि-युगे देवि सर्व-सौभाग्य-दायिनि।
रूपं देहि जयं देहि यशो देहि द्विषो जहि॥ ८॥

अचिन्त्य-रूप-चरिते सर्व-शत्रु-विनाशिनि।
रूपं देहि जयं देहि यशो देहि द्विषो जहि॥९॥

नतेभ्यस् सर्वदा भक्त्या चण्डिके दुरितापहे।
रूपं देहि जयं देहि यशो देहि द्विषो जहि॥ १०॥

स्तुवद्भ्यो भक्ति-पूर्वं त्वां चण्डिके व्याधि-नाशिनि।
रूपं देहि जयं देहि यशो देहि द्विषो जहि॥११॥

चण्डिके सततं ये त्वां अर्चयन्तीह भक्तितः।
रूपं देहि जयं देहि यशो देहि द्विषो जहि॥ १२॥

देहि सौभाग्य-मारोग्यं देहि मे परमं सुखम्।
रूपं देहि जयं देहि यशो देहि द्विषो जहि॥ १३॥

विधेहि द्विषतां नाशं विधेहि बल-मुच्चकैः।
रूपं देहि जयं देहि यशो देहि द्विषो जहि॥ १४॥

विधेहि देवि कल्याणं विधेहि परमां श्रियम्।
रूपं देहि जयं देहि यशो देहि द्विषो जहि॥ १५॥

सुरासुर-शिरो-रत्न-निघृष्ट-चरणेऽम्बिके।

रूपं देहि जयं देहि यशो देहि द्विषो जहि॥ १६॥

विद्या-वन्तं यशस्-वन्तं लक्ष्मी-वन्तं जनं कुरु।
रूपं देहि जयं देहि यशो देहि द्विषो जहि॥ १७॥

प्रचण्ड-दैत्य-दर्पघ्ने चण्डिके प्रणताय मे
रूपं देहि जयं देहि यशो देहि द्विषो जहि॥१८॥

चतुर्भुजे चतुर्-वक्त्र-संस्तुते परमेश्वरि।
रूपं देहि जयं देहि यशो देहि द्विषो जहि॥ १९॥

कृष्णेन संस्तुते देवि शश्वद्-भक्त्या सदाम्बिके।
रूपं देहि जयं देहि यशो देहि द्विषो जहि॥ २०॥

हिमाचल-सुतानाथ-संस्तुते परमेश्वरि।
रूपं देहि जयं देहि यशो देहि द्विषो जहि॥ २१॥

इन्द्राणी-पति-सद्-भाव-पूजिते परमेश्वरि।
रूपं देहि जयं देहि यशो देहि द्विषो जहि॥ २२॥

देवि प्रचण्ड-दोर्-दण्ड-दैत्य-दर्प-विनाशिनि ।
रूपं देहि जयं देहि यशो देहि द्विषो जहि॥२३॥

देवि भक्त-जनोद्-दाम-दत्ता-नन्दो-दयेऽम्बिके।
रूपं देहि जयं देहि यशो देहि द्विषो जहि॥ २४ ॥

पत्नीं मनोरमां देहि मनो-वृत्तानु-सारिणीम्।
तारिणीं दुख्-ख-संसार-सागरस्य कुलोद्-भवाम् ॥२५॥

इदं स्तोत्रं पठित्वा तु महा-स्तोत्रं पठेन्नरः।
स तु सप्तशती-संख्या-वरमाप्नोति संपदाम् ॐ॥२६॥

## कीलकम्

ॐ अस्य श्रीकीलक-मन्त्रस्य
शिव-ऋषिः। - Touch top of head with the right hand
अनुष्टुप् छन्दः। - Touch the mouth with right hand
श्रीमहासरस्वती देवता ।- Touch the heart with the right hand
श्रीजगदम्बा प्रीत्यर्थं सप्तशती-पाठाङ्गत्वेन जपे विनियोगः। Perform namaskar mudra

ॐ नमश्चण्डिकायै॥
मार्कण्डेय उवाच॥१॥

विशुद्ध-ज्ञान-देहाय त्रिवेदी-दिव्य-चक्षुषे।
श्रेयफ् प्राप्ति-निमित्ताय नमस् सोमार्ध-धारिणे॥ २॥

सर्व-मेतद्-द्विजानीयान्-मन्त्राणा-मभि-कीलकम्।
सोऽपि क्षेम-मवाप्-नोति सततं जाप्य-तत्परः॥३॥

सिद्ध्यन्-त्युच्-चाटनादीनि वस्तूनि सकलान्-यपि
एतेन स्तुवतां देवी स्तोत्र-मात्रेण सिद्ध्यति॥४॥

न मन्त्रो नौषधं तत्र न किञ्चिदपि विद्यते।
विना जाप्येन सिध्येत सर्वमुच्चाट-नादिकम्॥ ५॥

समग्राण्-यपि सिद्-ध्यन्ति लोक-शङ्का-मिमां हरः।
कृत्वा निमन्त्र-यामास सर्व-मेव-मिदं शुभम्॥६ ॥

स्तोत्रं वै चण्डिका-यास्तु तच्च गुप्तं चकार सः।
समाप्तिर्-न च पुण्यस्य तां यथा-वन्नि-यन्त्रणाम्॥ ७ ॥

सोऽपि क्षेम-मवाप्नोति सर्वमेवम् न संशयः।
कृष्णायां वा चतुर्दश्यां अष्टम्यां वा समाहितः॥ ८॥

ददाति प्रति-गृह्णाति नान्य-थैषा प्रसीदति।

इत्थं रूपेण कीलेन महादेवेन कीलितम्॥ ९॥

यो निष्कीलां विधायैनां नित्यं जपति संस्फुटम्।
स सिद्धस् स गणस् सोऽपि गन्धर्वो जायते नरः॥ १०॥

न चैवाप्-यटतस्-तस्य भयं क्वापीह जायते।
नाप-मृत्यु-वशं याति मृतो मोक्ष-मवाप्-नुयात्॥ ११॥

ज्ञात्वा प्रारभ्य कुर्वीत न कुर्वाणो विनश्यति।
ततो ज्ञात्वैव सम्पन्न-मिदं प्रारभ्यते बुधैः॥ १२॥

सौभाग्यादि च यत्-किञ्चिद् दृश्यते ललनाजने।
तत्सर्वं तत्-प्रसादेन तेन जाप्यमिदं शुभम्॥१३॥

शनैस्तु जप्य-मानेऽस्मिन् स्तोत्रे सम्पत्ति-रुच्-चकैः।
भवत्येव समग्रापि ततफ् प्रारभ्यमेव तत्॥ १४॥

ऐश्वर्यं यत्-प्रसादेन सौभाग्-यारोग्य-संपदः।
शत्रुहानिफ् परो मोक्षस् स्तूयते सा न किं जनैः॥ ॐ॥ १५॥

# तन्त्रोक्त रात्रिसूक्तम्

ॐ विश्वेश्वरीं जगद्धात्रीं स्थिति-सम्हार-कारिणीम्।
निद्रां भगवतीं विष्णो-रतुलां तेजसफ् प्रभुः॥

ब्रह्मोवाच ॥

त्वं स्वाहा त्वं स्वधा त्वं हि वषट्-कारस् स्वरात्मिका।
सुधा त्वमक्षरे नित्ये त्रिधा मात्रात्मिका स्थिता॥

अर्धमात्रा-स्थिता नित्या यानुच्-चार्या विशेषतः।
त्वमेव सन्ध्या सावित्री त्वं देवि जननी परा॥

त्वयै-तद्-धार्यते विश्वं तवयै-तत्-सृज्यते जगत्।
त्वयै-तत्-पाल्यते देवि त्वमत्-स्यन्ते च सर्वदा॥

विसृष्टौ सृष्टि-रूपा त्वं स्थिति-रूपा च पालने।
तथा संहृति-रूपान्ते जगतोऽस्य जगन्मये॥

महा-विद्या महामाया महामेधा महा-स्मृतिः।
महामोहा च भवती महादेवी महासुरी॥

प्रकृतिस्-त्वं च सर्वस्य गुणत्रय-विभाविनी।
कालरात्रिर्-महारात्रिर्-मोहरात्रिश्-च दारुणा॥

त्वं श्रीस्-त्वं-ईश्वरी त्वं ह्रीस्-त्वम् बुद्धिर्-बोध-लक्षणा।
लज्जा पुष्टिस्-तथा तुष्टिस्-त्वं शान्तिः क्षान्तिरेव च

खड्गिनी शूलिनी घोरा गदिनी चक्रिणी तथा।
शङ्खिनी चापिनी बाण-भुशुण्डी-परिघा-युधा॥

सौम्या सौम्य-तराशेष-सौम्ये-भ्यस्-त्वति-सुन्दरी।
परा-पराणां परमा त्वमेव परमेश्वरी॥

यच्च-किञ्चित् क्वचिद् वस्तु सद-सद्-वाखि-लात्मिके।
तस्य सर्वस्य या शक्तिस् सा त्वं किं स्तूयसे तदा॥

यया त्वया जगत्-स्त्रष्टा जगत्-पात्-यत्ति यो जगत्।
सोऽपि-निद्रा-वशं नीतक् कस्त्वां स्तोतु-मिहेश्वरः॥

विष्णुस् शरीर-ग्रहण-मह-मीशान एव च।
कारितास्ते यतोऽतस्-त्वां कस् स्तोतुं शक्तिमान्-भवेत्॥

सात्व-मित्थं प्रभा-वैस्-स्वै-रुदारैर्-देवि संस्तुता।

मोहयैतौ दुराधर्षा-वसुरौ मधुकैटभौ॥

प्रबोधं च जगत्-स्वामी नीयता-मच्युतो लघु।
बोधस्य क्रियता-मस्य हन्तु-मेतौ महासुरौ॥

## नवार्ण जपः (पूर्वार्धः)

ॐ अस्य श्री चण्डी महलक्ष्मी महामन्त्रस्य
ब्रह्म-विष्णु-रुद्रा ऋषयः। - Touch the top of head with the right hand
गायत्री-उष्णिग्-अनुष्टुभ्-छन्दाम्सि। - Touch the mouth with right hand
श्रीमहाकाली महालक्ष्मी महासरस्वत्यो देवताः- Touch the heart with right hand
ऐं बीजं - Touch the right side below chest with right hand
ह्रीं शक्तिः - Touch the left side below chest with right hand
क्लीं कीलकम्। - Touch below the chest with the right hand
श्रीमहाकाली महालक्ष्मी महासरस्वती प्रसाद सिद्ध्यर्थे जपे (जप होमे) विनियोगः॥ Perform namaskar mudra

ॐ ऐं अङ्गुष्टाभ्यां नमः। Roll the index finger on thumb from bottom to top
ह्रीं तर्जनीभ्यां नमः। Roll the thumb on index finger from bottom to top
क्लीं मध्यमाभ्यां नमः। Roll the thumb on middle finger from bottom to top
चामुण्डाये अनामिकाभ्यां नमः। Roll the thumb on ring finger from bottom to top
विच्चे कनिष्ठिकाभ्यां नमः। Roll the thumb on little finger from bottom to top

ऐं ह्रीं क्लीं चामुण्डायै विच्चे। कर-तल-कर-पृष्ठाभ्यां नमः। wipe each palm over the other palm on top and then bottom

ऐं हृदयाय नमः। - Touch the heart with the right hand

ह्रीं शिरसे स्वाहा। - Touch the top of head with the right hand

क्लीं शिखायै वषट्। - Touch the back of head with the right hand

चामुण्डायै कवचाय हुं। - Cross hands across chest

विच्चे नेत्र-त्रयाय वौषट्। - With Index, middle and ring fingers touch right eye, middle of the eye brows, and left eye respectively at the same time

ऐं ह्रीं क्लीं चामुण्डायै विच्चे अस्त्राय फट्।- Slap index finger and middle finger of the right hand on the left palm

भूर्भुवस्सुवरों इति दिग्बन्धः॥ - Click index finger and the thumb in 8 directions around the head clockwise

ध्यानम्

खड्गं चक्र-गदेषु-चाप-परिघां शूलं भुशुण्डीं शिरः।
शङ्खं सन्दधतीं करैस्-त्रिणयनां सर्वाङ्ग-भूषावृताम्।
नीलाश्मद्-द्युति-मास्य-पाद-दशकां सेवे महा-कालिकाम् ।
यामस्तौत्-स्वपिते हरौ कमलजो हन्तुं मधुं कैटभम्॥

अक्षस्त्रक्-परशुं गदेषु कुलिशं पद्मं धनुष् कुण्डिकां
दण्डं शक्तिमसिं च चर्मजलजं घण्टां सुराभाजनम्।
शूलं पाश-सुदर्शने च दधतीं हस्तैफ् प्रसन्नाननां
सेवे सैरिभ-मर्दिनीमिह महा लक्ष्मीं सरोज-स्थिताम्॥

घण्टा-शूल-हलानि शङ्ख-मुसले चक्रं धनुस् सायकं
हस्ताब्जैर्-दधतीं घनान्त-विलसच्-छीतांशु-तुल्य-प्रभाम् ।
गौरीदेह-समुद्भवां त्रिजगता-माधारभूतां महा-
पूर्वामत्र सरस्वती-मनुभजे शुम्भादि-दैत्यार्दिनीम्॥

लं पृथिव्यात्मने गन्धं कल्पयामि। Roll the thumb on the little finger from bottom to top
हं आकाशात्मने पुष्पं कल्पयामि। Roll the index finger on thumb from bottom to top
यं वाय्वात्मने धूपं कल्पयामि। Roll the thumb on the index finger from bottom to top
रं अग्न्यात्मने दीपम् कल्पयामि। Roll the thumb on the middle finger from bottom to top
वं अमृतात्मने अमृतं कल्पयामि। Roll the thumb on the ring finger from bottom to top
सं सर्वात्मने समस्तोपचारान् समर्पयामि। Perform namaskar mudra

## नवाक्षरी जपम्

ॐ ऐं ह्रीं क्लीं चामुण्डायै विच्चे॥

## नवाक्षरी जप होमम्

ॐ ऐं ह्रीं क्लीं चामुण्डायै विच्चे स्वाहा ॥

# सप्तशती न्यासः

प्रथम-मध्यमोत्तर-चरित्राणां
ब्रह्म-विष्णु-रुद्रा ऋषयः। - Touch the top of head with right hand
श्रीमहाकाळी-महालक्ष्मी-महासरस्वत्यो देवताः Touch the heart with the right hand
गायत्री-उष्णिग् - अनुष्टुभ्-छन्दांसि। - Touch the mouth with the right hand
नन्दा-शाकम्भरी-भीमाश् शक्तयः। - Touch the left side below chest with the right hand
रक्त-दन्तिका-दुर्गा-भ्रामर्यो बीजानि॥ - Touch the right side below chest with right hand
अग्नि-वायु-सूर्यास्-तत्वानि। - Touch middle below chest with right hand
ऋग्-यजुस् साम-वेदा ध्यानानि। -

सकल-कामना-सिद्धये श्रीमहाकाली महालक्ष्मी-महासरस्वती देवता प्रीत्यर्थे जपे विनियोगः॥ Perform namaskar mudra

ॐ खड्गनी शूलिनी घोरा गदिनी चक्रिणी तथा।
शङ्खिनी चापिनी बाण-भुशुण्डी परिघायुधा॥ अङ्गुष्ठाभ्यां नमः। Roll index finger on the thumb from bottom to top

शूलेन पाहि नो देवि पाहि खड्गेन चाम्बिके
घण्टास्वनेन नफ् पाहि चापज्या-निस्-स्वनेन च॥
तर्जनीभ्यां नमः। Roll the thumb on index finger from bottom to top

प्राच्यां रक्ष प्रतीच्यां च चण्डिके रक्ष दक्षिणे।

भ्रामणेनात्म-शूलस्य उत्तरस्यां तथेश्वरि। मध्यमाभ्यां नमः। Roll the thumb on the middle finger from bottom to top

सौम्यानि यानि रूपाणि त्रैलोक्ये विचरन्ति ते।
यानि चात्यर्थ-घोराणि तैरक्षास्-मांस्-तथा भुवम्॥
अनामिकाभ्यां नमः। Roll the thumb on the ring finger from bottom to top

खड्ग-शूल-गदादीनि यानि चास्त्राणि तेऽम्बिके।
करपल्लव-सङ्गीनि तैरस्मान्-रक्ष सर्वतः ॥कनिष्ठिकाभ्यां नमः। Roll the thumb on the little finger from bottom to top

सर्वस्वरूपे सर्वेशे सर्व-शक्ति-समन्विते।
भयेभ्यस्-त्राहि नो देवि दुर्गे देवि नमोऽस्तु ते॥
करतलकर-पृष्ठाभ्यां नमः। wipe each palm over the other palm on top and then bottom

खड्गिनी शूलिनी घोरा गदिनी चक्रिणी तथा।
शङ्खिनी चापिनी बाण-भुशुण्डी परिघायुधा॥ हृदयाय नमः । Touch the heart with the right hand

शूलेन पाहि नो देवि पाहि खड्गेन चाम्बिके।
घण्टास्वनेन नफ् पाहि चापज्यानिस् स्वनेन च॥ शिरसे स्वाहा। Touch the top of head with the right hand

प्राच्यां रक्ष प्रतीच्यां च चण्डिके रक्ष दक्षिणे।
भ्रामणे-नात्म-शूलस्य उत्तरस्यां तथेश्वरि। शिखायै वषट् । Touch back of the head with the right hand

सौम्यानि यानि रूपाणि त्रैलोक्ये विचरन्ति ते।

यानि चात्यर्थ-घोराणि तै रक्षास्-मांस्-तथा भुवम्॥ कवचाय हुम् ।
Cross the hands across the chest

खड्गशूल-गदादीनि यानि चास्त्राणि तेऽम्बिके।
करपल्लव-सङ्गीनि तैरस्मान्-रक्ष सर्वतः॥ नेत्र-त्रयाय वौषट् । With Index, middle and ring fingers touch right eye, middle of the eye brows, and left eye respectively at the same time

सर्वस्वरूपे सर्वेशे सर्व-शक्ति-समन्विते।
भयेभ्यस्त्राहि नो देवि दुर्गे देवि नमोऽस्तुते॥ अस्त्राय फट् । Slap the index finger and middle finger of the right hand on the palm of the left hand

भूर्भुवस्सुवरों इति दिग्बन्धः॥ Click index finger and the thumb in 8 directions around the head clockwise

ध्यानम्

विद्युद्दाम-समप्रभां मृगपतिस्-स्कन्धस्-स्थिताम् भीषणां।
कन्याभिक् करवाल-खेट-विलसद्-धस्ताभिरा-सेविताम्।
हस्तैश्-चक्र-गदासि-खेट-विशिखांश्-चापं गुणं तर्जनीं ।
बिभ्राणा-मनलात्मिकां शशिधरां दुर्गां त्रिणेत्रां भजे॥

लं पृथिव्यात्मने गन्धं कल्पयामि। Roll the thumb on little finger from bottom to top
हं आकाशात्मने पुष्पं कल्पयामि। Roll the index finger on thumb from bottom to top
यं वाय्वात्मने धूपं कल्पयामि। Roll the thumb on index finger from bottom to top
रं अग्न्यात्मने दीपं कल्पयामि। Roll thumb on middle finger from bottom to top
वं अमृतात्मने अमृतं कल्पयामि । Roll the thumb on the ring finger from bottom to top
सं सर्वात्मने समस्तोपचारान् समर्पयामि ॥ Perform namaskar mudra

# सप्तशति न्यास होमम्

खड्गिनी शूलिनी घोरा गदिनी चक्रिणी तथा।
शङ्खिनी चापिनी बाण-भुशुण्डी परिघायुधा॥ हृदय देव्यै स्वाहा॥

शूलेन पाहि नो देवि पाहि खड्गेन चाम्बिके।
घण्टास्वनेन नफ् पाहि चापज्यानिस् स्वनेन च॥ शिरो देव्यै स्वाहा॥

प्राच्यां रक्ष प्रतीच्यां च चण्डिके रक्ष दक्षिणे।
भ्रामणे-नात्म-शूलस्य उत्तरस्यां तथेश्वरि। शिखा देव्यै स्वाहा॥

सौम्यानि यानि रूपाणि त्रैलोक्ये विचरन्ति ते।
यानि चात्यर्थ-घोराणि तै रक्षास्-मांस्-तथा भुवम्॥
कवच देव्यै स्वाहा ॥

खड्गशूल-गदादीनि यानि चास्त्राणि तेऽम्बिके।
करपल्लव-सङ्गीनि तैरस्मान्-रक्ष सर्वतः॥ नेत्र देव्यै स्वाहा ॥

सर्वस्वरूपे सर्वेशे सर्व-शक्ति-समन्विते।
भयेभ्यस्त्राहि नो देवि दुर्गे देवि नमोऽस्तुते॥ अस्त्र देव्यै स्वाहा॥

# प्रथमोध्यायः

ॐ नमश्चण्डिकायै॥

(ऐं) मार्कण्डेय उवाच (**स् स्वाहा**)॥१

(ऐं) सावर्णिस् सूर्य-तनयो यो मनुक् कथ्य-तेऽष्टमः।
निशामय तदुत्-पत्तिं विस्तराद् गदतो मम (**स् स्वाहा**)॥२

(ऐं) महामायानु-भावेन यथा मन्वन्त-राधिपः।
स बभूव महाभागस् सावर्णिस्-तनयो रवेः (**स् स्वाहा**)॥३

(ऐं) स्वारो-चिषे-ऽन्तरे पूर्वं चैत्र-वंश समुद्-भवः।
सुरथो नाम राजाभूत् समस्ते क्षिति मण्डले (**स् स्वाहा** )॥ ४

(ऐं) तस्य पालयतस् सम्यक्-प्रजाप् पुत्रानि-वौरसान्।
बभूवुश् शत्रवो भूपाक् कोला-विध्वंसि-नस्-तदा (**स् स्वाहा** )

(ऐं) तस्य तैरभवद् युद्ध-मति-प्रबल-दण्डिनः।

न्यूनैरपि स तैर्-युद्धे कोला-विध्वंसि-भिर्-जितः (**स् स्वा॒हाँ**) ॥

(**ऐं**) ततस् स्वपुर-मायातो निज देशा-धिपो-ऽभवत्।
आक्रान्तस् स महा-भागस्-तैस्-तदा प्रबलारिभिः(**स् स्वा॒हाँ** )

(**ऐं**) अमात्यैर्-बलिभिर्-दुष्टैर्-दुर्बलस्य दुरात्-मभिः।
कोशो बलं चाप-हृतं तत्रापि स्वपुरे ततः(**स् स्वा॒हाँ** )॥८ ॥

(**ऐं**) ततो मृगया-व्याजेन हृतस्-स्वाम्यस् स भूपतिः।
एकाकी हय-मारुह्य जगाम गहनं वनम्(**स् स्वा॒हाँ** )॥९ ॥

(**ऐं**) स तत्राश्रम-मद्राक्षीद्-द्विज-वर्यस्य मेधसः।
प्रशान्तश्वा-पदाकीर्णं मुनि-शिष्योप-शोभितम्(**स् स्वा॒हाँ** )॥१०

(**ऐं**) तस्थौ कंचित्स कालं च मुनिना तेन सत्-कृतः।
इतश्-चेतश्च विचरम्स्-तस्मिन्-मुनि-वराश्रमे(**स् स्वा॒हाँ** )॥११

(**ऐं**) सो-ऽचिन्तयत्-तदा तत्र ममत्वा-कृष्ट-चेतनः ।

मत्-पूर्वैप् पालितं पूर्वं मया हीनं पुरं हि तत्(**स्‌ स्वा॒हाँ** )॥१२

(**ऐं**) मद्-भृत्यैस्-तैरसद्-वृत्तैर्-धर्मतप् पाल्यते न वा।
न जाने स प्रधानो मे शूर-हस्ती सदामदः(**स्‌ स्वा॒हाँ** )॥१३

(**ऐं**) मम वैरिवशं यातक् कान् भोगानुप-लप्स्यते।
ये ममानुगता नित्यं प्रसाद-धन-भोजनैः(**स्‌ स्वा॒हाँ** )॥१४

(**ऐं**) अनु-वृत्तिं ध्रुवं तेऽध्य कुर्वन्-त्यन्य-मही-भृताम्।
असम्यग्-व्यय-शीलैस्तैक् कुर्वद्भिस् सततं व्ययम्(**स्‌ स्वा॒हाँ** )

(**ऐं**) सञ्चितस् सोऽति-दुख्-खेन क्षयं कोशो गमिष्यति।
एतच्-चान्यच्च सततं चिन्तयामास पार्थिवः(**स्‌ स्वा॒हाँ** )॥१६

(**ऐं**) तत्र विप्राश्र-माभ्याशे वैश्य-मेकं ददर्श सः।
स पृष्टस्तेन कस्त्वं भो हेतुश्-चागमनेऽत्र कः(**स्‌ स्वा॒हाँ** )॥१७

(**ऐं**) सशोक इव कस्मात्वं दुर्मना इव लक्ष्यसे।

इत्या-कर्ण्य वचस्-तस्य भूपतेफ् प्रणयोदितम्(**स् स्वा॒हा॑** )॥

(**ऐं**) प्रत्युवाच स तं वैश्यफ् प्रश्रया-वनतो नृपम्(**स् स्वा॒हा॑** ) ॥१९

(**ऐं**) वैश्य उवाच (**स् स्वा॒हा॑** )॥२०

(**ऐं**) समाधिर्-नाम वैश्योऽह-मुत्पन्नो धनिनां कुले(**स् स्वा॒हा॑** ) ॥

(**ऐं**) पुत्र-दारैर्-निरस्-तश्च धन-लोभाद-साधुभिः।
विहीनश्च धनैर्-दारैफ् पुत्रैरादाय मे धनम्(**स् स्वा॒हा॑** )॥२२

(**ऐं**) वनमभ्यागतो दुख्खी निरस्-तश्-चाप्त-बन्धुभिः।
सोऽहं न वेद्मि पुत्राणां कुशला-कुशलात्-मिकाम्(**स् स्वा॒हा॑** )॥

(**ऐं**) प्रवृत्तिं स्वजनानां च दाराणां चात्र संस्थितः।
किं नु तेषां गृहे क्षेम-मक्षेमं किं नु साम्-प्रतम्(**स् स्वा॒हा॑** )॥२४

(**ऐं**) कथं ते किं नु सद्-वृत्ता दुर्-वृत्ताक् किं नु मे सुताः(**स् स्वा॒हा॑**)॥

(**ऐं**) राजोवाच (**स् स्वा॒हा॑** )॥२६॥

(ऐं) यैर्-निरस्तो भवाँल्-लुब्धैप् पुत्र-दारादिभिर्-धनैः(स् स्वाहा )॥

(ऐं) तेषु किं भवतस् स्नेह-मनु-बध्नाति मानसम् (स् स्वाहा )॥ २८॥

(ऐं) वैश्य उवाच (स् स्वाहा ) ॥२९

(ऐं) एव-मेतद्-यथा प्राह भवा-नस्मद्-गतं वचः(स् स्वाहा )॥३०॥

(ऐं) किं करोमि न बध्नाति मम निष्ठुरतां मनः।

यैस् संत्यज्य पितृ-स्नेहं धन-लुब्धैर्-निराकृतः( स् स्वाहा )॥३१

(ऐं) पतिस्-स्वजन-हार्दं च हार्दि तेष्वेव मे मनः।

किमेतन्-नाभि-जानामि जानन्-नपि महामते(स् स्वाहा )॥३२

(ऐं) यत्-प्रेम-प्रवणं चित्तं विगुणेष्वपि बन्धुषु।

तेषां कृते मे निश्वासो दौर्-मनस्यं च जायते(स् स्वाहा )॥३३

(ऐं) करोमि किं यन्न मनस्-तेष्व-प्रीतिषु निष्ठुरम्(स् स्वाहा )॥३४॥

(ऐं) मार्कण्डेय उवाच(स् स्वाहा ) ॥३५

(ऐं) ततस्तौ सहितौ विप्र तं मुनिं समु-पस्थितौ (**स् स्वाहा** )॥३६॥

(ऐं) समाधिर्-नाम वैश्योऽसौ स च पार्थिव-सत्तमः।
कृत्वा तु तौ यथान्-यायं यथार्हं तेन संविदम्(**स् स्वाहा** )॥३७

(ऐं) उपविष्टौ कथाक् काश्चिच्-चक्रतुर्-वैश्य-पार्थिवौ (**स् स्वाहा**)

(ऐं) राजोवाच(स् **स्वाहा** ) ॥३९

(ऐं) भगवंस्-त्वामहं प्रष्टुमिच्चाम्-म्येकं वदस्व तत्(**स् स्वाहा** )॥४०॥

(ऐं) दुख्-खाय यन्मे मनसस् स्वचित्ता-यत्-तताम् विना।
ममत्वं गत-राजस्य राज्याङ्गेष्-वखिलेष्वपि(**स् स्वाहा** )॥४१

(ऐं) जानतोऽपि यथा-ज्ञस्य किमेतन्-मुनि-सत्तम।
अयं च निकृतफ् पुत्रैर्-दारैर्-भृत्यैस्-तथोज्-झितः (**स् स्वाहा**)॥४२

(ऐं) स्वजनेन च संत्-यक्तस्-तेषु हार्दी तथाप्यति।
एवमेष तथाहं च द्वावप्-प्यत्-यन्त-दुख्खितौ(**स् स्वाहा** ) ॥४३

(**ऐं**) दृष्ट-दोषेऽपि विषये ममत्वा-कृष्ट-मानसौ।
तत्-किमेतन्-महाभाग यन्मोहो ज्ञानिनोरपि(**स्‌ स्वाहा** )॥४४

(**ऐं**) ममास्य च भवत्-येषा विवेकान्धस्य मूढता(**स्‌ स्वाहा** )॥ ४५॥

(**ऐं**) ऋषिरुवाच (**स्‌ स्वाहा** )॥४६

(**ऐं**) ज्ञानमस्ति समस्-तस्य जन्तोर्-विषय-गोचरे (**स्‌ स्वाहा**) ॥ ४७॥

(**ऐं**) विषयश्च महाभाग याति चैवं पृथक् पृथक्।
दिवान्धाफ् प्राणिनक् केचिद्-रात्रावन्धास्-तथापरे(**स्‌ स्वाहा**) ॥४८

(**ऐं**) केचिद्-दिवा तथा रात्रौ प्राणिनस्-तुल्य-दृष्टयः।
ज्ञानिनो मनुजास् सत्यं किं तु ते न हि केवलम् (**स्‌ स्वाहा** )॥४९

(**ऐं**) यतो हि ज्ञानिनस् सर्वे पशु-पक्षि-मृगादयः।
ज्ञानं च तन्-मनुष्याणां यत्तेषां मृग-पक्षिणाम्(**स्‌ स्वाहा** )॥५०

(**ऐं**) मनुष्याणां च यत्तेषां तुल्य-मन्यत्-तथो-भयोः।

ज्ञानेऽपि सति पश्यैतान् पतङ्गाञ्-छाव-चञ्चुषु(**स्‌ स्वा॒हां** )॥५१

(**ऐं**) कणमोक्षा-दृतान्-मोहात्-पीड्य-मानानपि क्षुधा।

मानुषा मनुज-व्याघ्र-साभिलाषास् सुतान् प्रति(**स्‌ स्वा॒हां** )॥५२

(**ऐं**) लोभात्-प्रत्युप-काराय नन्वेतान् किं न पश्यसि।

तथापि ममता-वर्ते मोह-गर्ते निपातिताः(**स्‌ स्वा॒हां** )॥५३

(**ऐं**) महामाया-प्रभावेण संसार-स्थिति-कारिणा।

तन्-नात्र विस्मयक् कार्यो योग-निद्रा जगत्पतेः(**स्‌ स्वा॒हां** )॥५४

(**ऐं**) महामाया हरेश्-चैषा तया संमोह्यते जगत्।

ज्ञानिनामपि चेतांसि देवी भगवती हि सा(**स्‌ स्वा॒हां** )॥५५

(**ऐं**) बलादा-कृष्य मोहाय महामाया प्रयच्छति।

तया विसृज्यते विश्वं जगदेतच्-चराचरम्(**स्‌ स्वा॒हां** )॥५६

(**ऐं**) सैषा प्रसन्ना वरदा नृणां भवति मुक्तये।

सा विध्या परमा मुक्तेर्-हेतुभूता सनातनी(**स्‌ स्वाहा** )॥५७

(**ऐं**) संसार-बन्ध -हेतुश्च सैव सर्वेश्-श्वरेश्वरी(**स्‌ स्वाहा** )॥५८

(**ऐं**) राजोवाच (**स्‌ स्वाहा** )॥५९

(**ऐं**) भगवन् का हि सा देवी महा-मायेति यां भवान्(**स्‌ स्वाहा**) ॥६०

(**ऐं**) ब्रवीति कथमुत्-पन्ना सा कर्मास्-याश्च किं द्विज।
यत्प्रभावा च सा देवी यत्-स्वरूपा यदुद्-भवा(**स्‌ स्वाहा** )॥६१

(**ऐं**) तत्-सर्वं श्रोतु-मिच्छामि त्वत्तो ब्रह्म-विदां वर(**स्‌ स्वाहा** ) ॥६२

(**ऐं**) ऋषिरुवाच (**स्‌ स्वाहा** )॥६३

(**ऐं**) नित्यैव सा जगन्-मूर्तिस्-तया सर्व-मिदं ततम् (**स्‌ स्वाहा**) ॥६४

(**ऐं**) तथापि तत्-समुत्-पत्तिर्-बहुधा श्रूयतां मम।
देवानां कार्य-सिद्ध्यर्थमाविर्-भवति सा यदा (**स्‌ स्वाहा** )॥६५

(**ऐं**) उत्पन्नेति तदा लोके सा नित्याप्-प्यभि-धीयते ।

योग-निद्रां यदा विष्णुर्-जगत्-येकार्णवी-कृते (**स् स्वाहा**) ॥६६

(**ऐं**) आस्तीर्य शेषम-भजत्-कल्पान्ते भगवान् प्रभुः।

तदा द्वावसुरौ घोरौ विख्यातौ मधुकैटभौ (**स् स्वाहा**) ॥६७

(**ऐं**) विष्णु-कर्ण-मलोद्-भूतौ हन्तुं ब्रह्माण-मुद्यतौ।

स नाभिकमले विष्णोस् स्थितो ब्रह्मा प्रजापतिः (**स् स्वाहा**) ॥६८

(**ऐं**) दृष्ट्वा तावसुरौ चोग्रौ प्रसुप्तं च जनार्दनम्।

तुष्टाव योगनिद्रां तामेकाग्र-हृदय-स्थितः(**स् स्वाहा**) ॥६१

(**ऐं**) विबोध-नार्थाय हरेर्-हरि-नेत्र-कृतालयाम्।

विश्वेश्वरीं जगद्धात्रीं स्थिति-संहार-कारिणीम्(**स् स्वाहा**) ॥७०

(**ऐं**) निद्रां भगवतीं विष्णोरतुलां तेजसफ् प्रभुः (**स् स्वाहा**) ॥७१

(**ऐं**) ब्रह्मोवाच(**स् स्वाहा**) ॥७२

(**ऐं**) त्वं स्वाहा त्वं स्वधा त्वं हि वषड्कारस् स्वरात्मिका (**स् स्वा॒हा॑**)॥७३

(**ऐं**) सुधा त्व-मक्षरे नित्ये त्रिधा मात्रात्मिका स्थिता।
अर्ध-मात्रा-स्थिता नित्या यानुच्-चार्या विशेषतः(**स् स्वा॒हा॑** )॥७४

(**ऐं**) त्वमेव संध्या सावित्री त्वं देवि जननी परा।
त्वयैतद्-धार्यते विश्वं त्वयैतत्-सृज्यते जगत्(**स् स्वा॒हा॑** )॥७५

(**ऐं**) त्वयैतत्-पाल्यते देवि त्वमत्-स्यन्ते च सर्वदा।
विसृष्टौ सृष्टि-रूपा त्वं स्थिति-रूपा च पालने(**स् स्वा॒हा॑** )॥७६

(**ऐं**) तथा संहृति-रूपान्ते जगतोऽस्य जगन्मये।
महाविध्या महामाया महामेधा महा-स्मृतिः (**स् स्वा॒हा॑** )॥७७

(**ऐं**) महामोहा च भवती महादेवी महासुरी।
प्रकृतिस्-त्वं च सर्वस्य गुणत्रय-विभाविनी(**स् स्वा॒हा॑** )॥७८

(**ऐं**) काल-रात्रिर्-महा-रात्रिर्-मोह-रात्रिश्च दारुणा।

त्वं श्रीस्त्व-मीश्वरी त्वं ह्रीस्-त्वं बुद्धिर्-बोध-लक्षणा (**स् स्वा॒हाँ** )

(**ऐं**) लज्जा पुष्टिस्-तथा तुष्टिस्-त्वं शन्तिः क्षान्तिरेव च।

खड्गिनी शूलिनी घोरा गदिनी चक्रिणी तथा(**स् स्वा॒हाँ** )॥८०

(**ऐं**) शङ्खिनी चापिनी बाण-भुशुण्डी-परिघा-युधा।

सौम्या सौम्य-तराशेष-सौम्येभ्यस्-त्वति-सुन्दरी(**स् स्वा॒हाँ** )॥८१

(**ऐं**) परा-पराणां परमा त्वमेव परमेश्वरी।

यच्च किञ्चित्-क्वचिद्-वस्तु सदसद्-वाखि-लात्मिके (**स् स्वा॒हाँ** )॥

(**ऐं**) तस्य सर्वस्य या शक्तिस् सा त्वं किं स्तूयसे तदा।

यया त्वया जगत्-स्रष्टा जगत्-पात्यत्ति यो जगत्(**स् स्वा॒हाँ** )॥८३

(**ऐं**) सोऽपि निद्रावशं नीतक् कस्त्वां स्तोतु-मिहेश्वरः।

विष्णुश् शरीर-ग्रहण-मह-मीशान एव च(**स् स्वा॒हाँ** )॥८४

(**ऐं**) कारि-तास्ते यतो-ऽतस्त्वां कस् स्तोतुं शक्तिमान् भवेत्।

सा त्वमित्थं प्रभावैस्-स्वैरु-दारैर्-देवि संस्तुता (**स् स्वाहा** )॥

(**ऐं**) मोहयैतौ दुराधर्षा-वसुरौ मधु-कैटभौ ।
प्रबोधं च जगत्-स्वामी नीयता-मच्युतो लघु(**स् स्वाहा** )॥८६

(**ऐं**) बोधश्च क्रिय-तामस्य हन्तुमेतौ महासुरौ (**स् स्वाहा**)॥८७

(**ऐं**) ऋषिरुवाच (**स् स्वाहा** )॥८८

(**ऐं**) एवं स्तुता तदा देवी तामसी तत्र वेधसा(**स् स्वाहा** )॥८९

(**ऐं**) विष्णोफ् प्रबोध-नार्थाय निहन्तुं मधु-कैटभौ।
नेत्रास्य-नासिका-बाहु-हृदयेभ्यस्-तथोरसः (**स् स्वाहा** )॥९०

(**ऐं**) निर्गम्य दर्शने तस्थौ ब्रह्मणो-ऽव्यक्त-जन्मनः।
उत्तस्थौ च जगन्नाथस्-तया मुक्तो जनार्दनः(**स् स्वाहा** )॥९१

(**ऐं**) एकार्ण-वेऽहि-शयनात्-ततस् स ददृशे च तौ।
मधुकैटभौ दुरात्माना-वति-वीर्य-पराक्रमौ (**स् स्वाहा** )॥९२

(ऐं) क्रोध-रक्तेक्षणा-वत्तुं ब्रह्माणं जनितो-ध्यमौ।
समुत्थाय ततस्-ताभ्यां युयुधे भगवान् हरिः(स् स्वा॒हाँ )॥९३

(ऐं) पञ्चवर्ष-सहस्त्राणि बाहु-प्रहरणो विभुः।
तावप्-प्यति-बलोन्-मत्तौ महामाया-विमोहितौ (स् स्वा॒हाँ )॥९४

(ऐं) उक्त-वन्तौ वरोऽस्-मत्तो व्रियता-मिति केशवम् (स् स्वा॒हाँ )॥१५

(ऐं) श्रीभगवानुवाच (स् स्वा॒हाँ )॥९६

(ऐं) भवेता-मध्य मे तुष्टौ मम वध्या-वुभावपि(स् स्वा॒हाँ )॥९७

(ऐं) किमन्येन वरेणात्र एता-वद्धि वृतं मम(स् स्वा॒हाँ )॥९८

(ऐं) ऋषिरुवाच (स् स्वा॒हाँ )॥९९

(ऐं) वञ्चिताभ्या-मिति तदा सर्व-मापोमयं जगत्(स् स्वा॒हाँ )॥

(ऐं) विलोक्य ताभ्यां गदितो भगवान् कमलेक्षणः।
आवां जहि न यत्रोर्वी सलिलेन परिप्लुता(स् स्वा॒हाँ )॥१०१

(ऐं) ऋषिरुवाच (स॒ स्वा॒हाँ )॥१०२

(ऐं) तथेत्-युक्त्वा भगवता शङ्ख-चक्र-गदा-भृता।
कृत्वा चक्रेण वैच्-छिन्ने जघने शिरसी तयोः(स॒ स्वा॒हाँ )॥१०३
(ऐं) एवमेषा समुत्-पन्ना ब्रह्मणा संस्तुता स्वयम्।
प्रभावमस्या देव्यास्तु भूयश् शृणु वदामि ते(स॒ स्वा॒हाँ )॥ ऐं ॐ ॥१०४

**Parayana Ghosham**

**स॒त्यास् सं॑न्तु यज॑मानस्य॒ कामाँः।**
नमो देव्यै महादेव्यै शिवायै सततं नमः।
नमफ् प्रकृत्यै भद्रायै नियताफ् प्रणतास् स्म ताम्॥
साङ्गायै सायुधायै सपरिवारायै सर्वात्मिकायै
वाग्भवबीजा-धिष्ठात्र्यै श्रीमहाकाळ्यै नमः ॥

**Homa Ghosham**

**स॒त्यास् सं॑न्तु यज॑मानस्य॒ कामाँः।**
नमो देव्यै महादेव्यै शिवायै सततं नमः।
नमफ् प्रकृत्यै भद्रायै नियताफ् प्रणतास् स्म ताम्॥
साङ्गायै सायुधायै सपरिवारायै सर्वात्मिकायै
वाग्भवबीजा- धिष्ठात्र्यै श्रीमहाकाळ्यै

महाहुतिं समर्पयामि नमस् **स्वा॒हा॑** ॥ वौषट्॥

वाग्भवबीजा-धिष्ठात्र्यै श्रीमहाकाल्यायिदन्नमम॥

## द्वितीयोध्यायः

ॐ ह्रीं ऋषिरुवाच(**स् स्वा॒हा॑** )॥१

(**ह्रीं**) देवा-सुरम-भूद्-युद्धं पूर्णमब्द-शतं पुरा।
महिषे-ऽसुराणा-मधिपे देवानां च पुरन्दरे(**स् स्वा॒हा॑** )॥ २

(**ह्रीं**) तत्रा-सुरैर्-महावीर्यैर्-देव-सैन्यं पराजितम्।
जित्वा च सकलान् देवा-निन्द्रोऽभून्-महिषासुरः (**स् स्वा॒हा॑** )॥३

(**ह्रीं**) ततफ् पराजिता देवाफ् पद्म-योनिं प्रजापतिम्।
पुरस्-कृत्य गतास्-तत्र यत्रेश-गरुडध्वजौ (**स् स्वा॒हा॑** )॥४

(**ह्रीं**) यथा-वृत्तं तयोस्-तद्-वन्-महिषासुर-चेष्टितम्।

त्रिदशाक् कथया-मासुर्-देवाभि-भव-विस्तरम्(**स् स्वाहा** )॥५

(**ह्लीं**) सूर्येन्-द्राग्न्य-निलेन्दूनां यमस्य वरुणस्य च।
अन्येषां चाधिकारान् स स्वय-मेवाधि-तिष्ठति(**स् स्वाहा** )॥६
(**ह्लीं**) स्वर्गान्-निराकृतास् सर्वे तेन देवगणा भुवि।
विचरन्ति यथा मर्त्या महिषेण दुरात्मना(**स् स्वाहा** )॥७

(**ह्लीं**) एतद्-वक् कथितं सर्व-ममरारि-विचेष्टितम्।
शरणं वफ् प्रपन्नास् स्मो वधस्-तस्य विचिन्-त्यताम् (**स् स्वाहा** )॥ ८

(**ह्लीं**) इत्थं निशम्य देवानां वचांसि मधुसूदनः।
चकार कोपं शम्भुश्च भ्रुकुटी-कुटिलाननौ(**स् स्वाहा** )॥९

(**ह्लीं**) ततोऽति-कोप-पूर्णस्य चक्रिणो वदनात्-ततः।
निश्-चक्राम महत्तेजो ब्रह्मणश् शङ्करस्य च(**स् स्वाहा** )॥१०

(**ह्लीं**) अन्येषां चैव देवानां शक्रादीनां शरीरतः।
निर्गतं सुमहत्-तेजस्-तच्-चैक्यं सम-गच्छत (**स् स्वाहा** )॥११

(**ह्लीं**) अतीव तेजसक् कूटं ज्वलन्त-मिव पर्वतम्।
ददृ-शुस्ते सुरास्-तत्र ज्वाला-व्याप्त-दिगन्तरम् (**स् स्वा॒हा॑**)॥१२

(**ह्लीं**) अतुलं तत्र तत्-तेजस् सर्व-देव-शरीरजम्।
एकस्थं तदभून्-नारी व्याप्त-लोकत्रयं त्विषा(**स् स्वा॒हा॑**)॥१३

(**ह्लीं**) यद-भूच्-छाम्भवं तेजस्-तेना-जायत तन्मुखम्।
याम्येन चाभवन् केशा बाहवो विष्णु-तेजसा(**स् स्वा॒हा॑**)॥१४

(**ह्लीं**) सौम्येन स्तनयोर्-युग्मं मध्यं चैन्द्रेण चाभवत्।
वारुणेन च जङ्घोरू नितम्बस्-तेजसा भुवः(**स् स्वा॒हा॑**)॥१५

(**ह्लीं**) ब्रह्मणस्-तेजसा पादौ तदङ्-गुल्-योऽर्क-तेजसा।
वसूनां च कराङ्गुल्यक् कौबेरेण च नासिका(**स् स्वा॒हा॑**)॥१६

(**ह्लीं**) तस्यास्तु दन्तास् सम्भूताफ् प्राजा-पत्येन तेजसा।
नयन-त्रितयं जज्ञे तथा पावक-तेजसा(**स् स्वा॒हा॑**)॥१७

(**ह्लीं**) भ्रुवौ च संध्य-योस्-तेजश् श्रवणा-वनिलस्य च।
अन्येषां चैव देवानां सम्भवस्-तेजसां शिवा(**स् स्वाहा**)॥१८

(**ह्लीं**) ततस् समस्त-देवानां तेजो-राशि-समुद्-भवाम्।
तां विलोक्य मुदं प्रापुरमरा महिषार्-दिताः(**स् स्वाहा**)॥१९

(**ह्लीं**) शूलं शूलाद्-विनिष्-कृष्य ददौ तस्यै पिनाक-धृक्।
चक्रं च दत्तवान् कृष्णस् समुत्-पाध्य स्व-चक्रतः (**स् स्वाहा**)॥२०

(**ह्लीं**) शङ्खं च वरुणस् शक्तिं ददौ तस्यै हुताशनः।
मारुतो दत्तवांश्-चापं बाणपूर्णे तथेषुधी॥ (**स् स्वाहा**)॥२१

(**ह्लीं**) वज्र-मिन्द्रस् समुत्-पाद्य कुलिशा-दमराधिपः।
ददौ तस्यै सहस्-राक्षो घण्टा-मैरावताद्-गजात् (**स् स्वाहा**)॥ २२

(**ह्लीं**) काल-दण्डाद्यमो दण्डं पाशं चाम्बु-पतिर्-ददौ।
प्रजापतिश्-चाक्षमालां ददौ ब्रह्मा कमण्डलुम्(**स् स्वाहा**)॥२३

(**ह्लीं**) समस्त-रोम-कूपेषु निज-रश्मीन् दिवाकरः।
कालश्च दत्तवान् खड्गं तस्याश्-चर्म च निर्मलम् (**स् स्वाहा॒ं**)॥२४

(**ह्लीं**) क्षीरोदश्-चामलं हारमजरे च तथाम्बरे।
चूडामणिं तथा दिव्यं कुण्डले कटकानि च(**स् स्वाहा॒ं**)॥२५

(**ह्लीं**) अर्ध-चन्द्रं तथा शुभ्रं केयूरान् सर्व-बाहुषु।
नूपुरौ विमलौ तद्-वद् ग्रैवेयक-मनुत्तमम्(**स् स्वाहा॒ं**)॥२६

(**ह्लीं**) अङ्गु-लीयक-रत्नानि समस्तास्-स्वङ्गुलीषु च।
विश्व-कर्मा ददौ तस्यै परशुं चाति-निर्मलम्(**स् स्वाहा॒ं**)॥२७

(**ह्लीं**) अस्त्राण्य-नेक-रूपाणि तथा-भेद्यं च दंशनम्।
अम्लान-पङ्कजां मालां शिरस्-युरसि चापराम्(**स् स्वाहा॒ं**)॥२८

(**ह्लीं**) अद-दज्-जलधिस्-तस्यै पङ्कजं चाति-शोभनम्।
हिमवान् वाहनं सिंहं रत्नानि विविधानि च(**स् स्वाहा॒ं**)॥२९

(ह्रीं) ददाव-शून्यं सुरया पान-पात्रं धना-धिपः।
शेषश्च सर्व-नागेशो महामणि-विभूषितम्(स् स्वाहा )॥३०

(ह्रीं) नागहारं ददौ तस्यै धत्ते यफ् पृथिवी-मिमाम्।
अन्यैरपि सुरैर्-देवी भूषणै-रायुधैस्-तथा(स् स्वाहा )॥३१

(ह्रीं) सम्मानिता नना-दोच्चैस् साट्ट-हासं मुहुर्-मुहुः।
तस्या नादेन घोरेण कृत्स्न-मा-पूरितं नभः(स् स्वाहा )॥३२

(ह्रीं) अमाय-ताति-महता प्रति-शब्दो महानभूत्।
चुक्षुभुस् सकला लोकास् समुद्राश्च चकम्पिरे(स् स्वाहा )॥३३

(ह्रीं) चचाल वसुधा चेलुस् सकलाश्च महीधराः।
जयेति देवाश्च मुदा तामूचुस् सिंह-वाहिनीम्(स् स्वाहा )॥३४

(ह्रीं) तुष्टुवुर्-मुनयश्-चैनां भक्ति-नम्रात्म-मूर्तयः।
दृष्ट्वा समस्तं संक्षुब्धं त्रैलोक्य-ममरारयः(स् स्वाहा )॥३५

(**ह्लीं**) सन्नद्-धाखिल-सैन्यास्ते समुत्तस्-थुरु-दायुधाः।
आक् किमेत-दिति क्रोधा-दाभाष्य महिषासुरः(**स् स्वाहा**)॥३६

(**ह्लीं**) अभ्य-धावत तं शब्द-मशेषै-रसुरैर्-वृतः।
स ददर्श ततो देवीं व्याप्त-लोकत्रयां त्विषा(**स् स्वाहा**)॥३७

(**ह्लीं**) पादा-क्रान्त्या नतभुवं किरीटोल्-लिखि-ताम्बराम्
क्षोभिता-शेष-पातालां धनुर्-ज्या-निस्- स्वनेन ताम् ॥ (**स् स्वाहा**)॥

(**ह्लीं**) दिशो भुज-सहस्रेण समन्-ताद्-व्याप्य संस्थिताम् ।
ततफ् प्रव-वृते युद्धं तया देव्या सुरद्-विषाम्(**स् स्वाहा**)॥३९

(**ह्लीं**) शस्त्रास्-त्रैर्-बहुधा मुक्तै-रादी-पित-दिगन्तरम्।
महिषासुर-सेनानीस् चिक्षु-राख्यो महासुरः(**स् स्वाहा**)॥४०

(**ह्लीं**) युयुधे चामरश्-चान्यैश्-चतु-रङ्ग-बलान्वितः।
रथाना-मयुतैष् षड्भि-रुद-ग्राख्यो महासुरः(**स् स्वाहा**)॥४१

(**ह्लीं**) अयुध्यता-युतानां च सहस्रेण महा-हनुः।
पञ्चाशद्-भिश्च नियुतै-रसिलोमा महासुरः(**स् स्वाहा** )॥४२

(**ह्लीं**) अयुतानां शतैस् षड्भिर्-बाष्कलो युयुधे रणे।
गजवाजि-सहस्-रौघै-रनेकैफ् परिवारितः(**स् स्वाहा** )॥४३

(**ह्लीं**) वृतो रथानां कोट्या च युद्धे तस्मिन्-नयुध्-यत।
बिडाला-ख्योऽयु-तानां च पञ्चा-शद्भि-रथायुतैः (**स् स्वाहा** )॥

(ह्लीं) युयुधे संयुगे तत्र रथानां परिवारितः।
अन्ये च तत्रा-युतशो रथनाग-हयैर्-वृताः(**स् स्वाहा** )॥४५

(**ह्लीं**) युयुधुस् संयुगे देव्या सह तत्र महासुराः।
कोटि-कोटि-सहस्रैस्तु रथानां दन्तिनां तथा(**स् स्वाहा** )॥४६

(**ह्लीं**) हयानां च वृतो युद्धे तत्राभून्-महिषासुरः।
तोमरैर्-भिन्दि-पालैश्च शक्तिभिर्-मुसलैस्-तथा (**स् स्वाहा** )॥४७

(ह्लीं) युयुधुस् संयुगे देव्या खड्गैफ् परशु-पट्टिशैः।

केचिच्च चिक्षिपुश् शक्तीक् केचित् पाशांस्-तथापरे (स् स्वाहा)॥४८

(ह्लीं) देवीं खड्ग-प्रहारैस्तु ते तां हन्तुं प्रचक्रमुः।

सापिदेवी ततस्तानि शस्त्राण्-यस्त्राणि चण्डिका(स् स्वाहा )॥४९

(ह्लीं) लीलयैव प्रचिच्छेद निज-शस्त्रास्त्र-वर्षिणी।

अनायस्-तानना देवी स्तूयमाना सुरर्-षिभिः (स् स्वाहा )॥५०

(ह्लीं) मुमोचा-सुर-देहेषु शस्त्राण्-यस्त्राणि चेश्वरी।

सोऽपि क्रुद्धो धुतसटो देव्या वाहन-केसरी(स् स्वाहा )॥५१

(ह्लीं) चचारा-सुर-सैन्येषु वनेष्-विव हुताशनः।

निश्-श्वासान् मुमुचे यांश्च युध्यमाना रणेऽम्बिका(स् स्वाहा )॥५२

(ह्लीं) त एव सद्यस् सम्भूता गणास् शत-सहस्रशः।

युयु-धुस्ते परशुभिर्-भिन्दि-पालासि-पट्टिशैः(स् स्वाहा )॥५३

(**ह्लीं**) नाशयन्तो-ऽसुरगणान् देवी-शक्-त्युप-बृंहिताः।
अवादयन्त पटहान् गणास् शङ्खांस्-तथापरे(**स् स्वाहा॑** )॥५४

(**ह्लीं**) मृदङ्गांश्च तथैवान्ये तस्मिन् युद्ध-महोत्सवे।
ततो देवी त्रिशूलेन गदया शक्ति-वृष्टिभिः(**स् स्वाहा॑** )॥५५

(**ह्लीं**) खड्गादि-भिश्च शतशो निजघान महासुरान्।
पातयामास चैवान्यान् घण्टास्वन-विमोहितान्(**स् स्वाहा॑** )॥५६

(**ह्लीं**) असुरान् भुवि पाशेन बद्ध्वा चान्यान-कर्षयत्।
केचिद् द्विधा-कृतास्-तीक्ष्णैख् खड्ग-पातैस्-तथापरे(**स् स्वाहा॑** )॥

(**ह्लीं**) विपोथिता निपातेन गदया भुवि शेरते।
वेमुश्च केचिद्-रुधिरं मुसलेन भृशं हताः(**स् स्वाहा॑** )॥५८

(**ह्लीं**) केचिन्-निपतिता भूमौ भिन्नास् शूलेन वक्षसि।
निरन्तरास् शरौघेण कृताक् केचिद्-द्रणाजिरे(**स् स्वाहा॑** )॥५९

(ह्लीं) श्येनानु-कारिणफ् प्राणान् मुमुचुस्-त्रिदशार्-दनाः।

केषांचिद् बाहवश्-छिन्नाश्-छिन्न-ग्रीवास्-तथापरे (स् स्वाहाँ )॥६०

(ह्लीं) शिरांसि पेतु-रन्येषा-मन्ये मध्ये विदारिताः।

विच्छिन्न-जङ्घास्-त्वपरे पेतु-रुर्व्यां महासुराः(स् स्वाहाँ )॥६१

(ह्लीं) एक-बाह्-वक्षि-चरणाक् केचिद्-देव्या द्विधा-कृताः।

छिन्नेऽपि चान्ये शिरसि पतिताफ् पुन-रुत्थिताः(स् स्वाहाँ )॥६२

(ह्लीं) कबन्धा युयुधुर्-देव्या गृहीत-परमा-युधाः।

ननृतुश्-चापरे तत्र युद्धे तूर्य-लया-श्रिताः(स् स्वाहाँ )॥६३

(ह्लीं) कबन्धाश्-छिन्न-शिरसख् खड्ग-शक्त्-यृष्टि पाणयः।

तिष्ठ तिष्ठेति भाषन्तो देवी-मन्ये महासुराः(स् स्वाहाँ )॥६४

(ह्लीं) पातितै रथ-नागाश्वै-रसुरैश्च वसुन्धरा।

अगम्या साभवत्-तत्र यत्राभूत् स महारणः(स् स्वाहाँ )॥६५

(**ह्लीं**) शोणि-तौघा महानद्यस् सद्यस्-तत्र प्रसुस्-स्रुवुः।
मध्ये चासुर-सैन्यस्य वारणासुर-वाजिनाम्(**स्<u></u> स्वाहाँ** )॥६६

(**ह्लीं**) क्षणेन तन्महा-सैन्य-मसुराणां तथाम्बिका।
निन्ये क्षयं यथा वन्-हिस्-तृणदारु-महाचयम्(**स् स्वाहाँ** )॥६७

(**ह्लीं**) स च सिंहो महानाद-मुत्-सृजन् धुत-केसरः।
शरीरेभ्यो-ऽमरारीणा-मसूनिव विचिन्वति(**स् स्वाहाँ** )॥६८

(**ह्लीं**) देव्या गणैश्च तैस्-तत्र कृतं युद्धं महासुरैः।
यथैषां तुतु-षुर्-देवाफ् पुष्प-वृष्टि-मुचो दिवि ॥६९॥ॐ॥ (**स् स्वाहाँ**
ह्लीं ॐ)

**Parayana Ghosham**

**स॒त्यास् सं॑न्तु॒ यजं॑मानस्य॒ कामाँः।**

नमो देव्यै महादेव्यै शिवायै सततं नमः।
नमफ् प्रकृत्यै भद्रायै नियताफ् प्रणतास् स्म ताम्॥
साङ्गायै सायुधायै सपरिवारायै सर्वात्मिकायै

लक्ष्मीबीजा-धिष्ठात्र्यै श्रीमहालक्ष्म्यै नमः ॥

**Homa Ghosham**

**स॒त्यास्॒ सं॑न्तु॒ यजं॑मानस्य॒ कामाः॑।**

नमो देव्यै महादेव्यै शिवायै सततं नमः।
नमफ् प्रकृत्यै भद्रायै नियताफ् प्रणतास् स्म ताम्॥
साङ्गायै सायुधायै सपरिवारायै सर्वात्मिकायै
लक्ष्मी-बीजा-धिष्ठात्र्यै श्रीमहालक्ष्म्यै

महाहुतिं समर्पयामि नमस् **स्वा॒हा॑** ॥ वौषट्॥

लक्ष्मी-बीजा-धिष्ठात्र्यै श्रीमहालक्ष्म्यायिदन्नमम॥

## तृतीयोध्यायः

ॐ (**ह्लीं**) ऋषिरुवाच(**स् स्वा॒हा॑** )॥१

(**ह्लीं**) निहन्यमानं तत्-सैन्य-मवलोक्य महासुरः।
सेनानीश्-चिक्षुरक् कोपाद्-ययौ योद्धु-मथाम्-बिकाम् (**स् स्वा॒हा॑** )
(**ह्लीं**) स देवीं शर-वर्षेण ववर्ष समरेऽसुरः।

यथा मेरुगिरेश् शृङ्गं तोय-वर्षेण तोयदः(**स् स्वा॒हा॑**)॥३

(**ह्लीं**) तस्यछ्- छित्वा ततो देवी लीलयैव शरोत्-करान्।
जघान तुरगान्-बाणैर्-यन्तारं चैव वाजिनाम्(**स् स्वा॒हा॑**)॥४

(**ह्लीं**) चिच्छेद च धनुस् सद्यो ध्वजं चाति-समुच्-छ्रितम्।
विव्याध चैव गात्रेषु छिन्न-धन्वान-माशुगैः(**स् स्वा॒हा॑**)॥५

(**ह्लीं**) साच्छिन्न-धन्वा विरथो हताश्वो हत-सारथिः।
अभ्य-धावत तां देवीं खड्ग-चर्म-धरोऽसुरः(**स् स्वा॒हा॑**)॥६

(**ह्लीं**) सिंह-माहत्य खड्गेन तीक्ष्ण-धारेण मूर्धनि।
आजघान भुजे सव्ये देवीमप्यति-वेगवान्(**स् स्वा॒हा॑**)॥७

(**ह्लीं**) तस्याख् खड्गो भुजं प्राप्य पफाल नृप-नन्दन।
ततो जग्राह शूलं स कोपादरुण-लोचनः(**स् स्वा॒हा॑**)॥८

(**ह्लीं**) चिक्षेप च ततस्-तत्तु भद्रकाल्यां महासुरः।

जाज्-वल्यमानं तेजोभी रवि-बिम्ब-मिवाम्बरात्(**स्  स्वा॒हा॑**  )॥९

(**ह्रीं**) दृष्ट्वा तदा-पतच्-छूलं देवी शूलम-मुञ्चत।
तच्छूलं-शतधा तेन नीतं स च महासुरः(**स्  स्वा॒हा॑**  )॥१०

(**ह्रीं**) हते तस्मिन्-महा-वीर्ये महिषस्य चमूपतौ।
आजगाम गजा-रूढश्-चामरस्-त्रि-दशार्दनः(**स्  स्वा॒हा॑**  )॥११

(**ह्रीं**) सोऽपि शक्तिं मुमोचाथ देव्यास्-तामम्बिका द्रुतम्।
हुंकारा-भिहतां भूमौ पातयामास निष्-प्रभाम्(**स्  स्वा॒हा॑**  )॥१२

(**ह्रीं**) भग्नां शक्तिं निपतितां दृष्ट्वा क्रोध-समन्वितः।
चिक्षेप चामरश् शूलं बाणैस्-तदपि साच्छिनत्(**स्  स्वा॒हा॑**  )॥१३

(**ह्रीं**) ततस् सिंहस् समुत्पत्य गज-कुम्भान्तरे स्थितः।
बाहु-युद्धेन युयुधे तेनोच्चैस्-त्रि-दशारिणा(**स्  स्वा॒हा॑**  )॥१४

(**ह्रीं**) युध्य-मानौ ततस्तौ तु तस्मान्-नागान्-महीं गतौ।

युयु-धातेऽति-संरब्धौ प्रहारै-रति-दारुणैः(**स्‌ स्वाहा**)॥१५

(**ह्लीं**) ततो वेगात्‌ खमुत्‌-पत्य निपत्य च मृगारिणा।
कर-प्रहारेण शिरश्‌-चामरस्य पृथक्‌ कृतम्‌(**स्‌ स्वाहा**)॥१६

(**ह्लीं**) उदग्रश्च रणे देव्या शिला-वृक्षादि-भिर्‌-हतः।
दन्त-मुष्टि-तलैश्‌-चैव करालश्च निपातितः (**स्‌ स्वाहा**)॥१७

(**ह्लीं**) देवी क्रुद्धा गदा-पातैश्‌-चूर्णयामास चोद्धतम्‌।
बाष्कलं भिन्दि-पालेन बाणैस्‌-ताम्रं तथान्धकम्‌ (**स्‌ स्वाहा**)॥१८

(**ह्लीं**) उग्रास्य-मुग्र-वीर्यं च तथैव च महा-हनुम्‌।
त्रिनेत्रा च त्रिशूलेन जघान परमेश्वरी(**स्‌ स्वाहा**)॥१९

(**ह्लीं**) बिडालस्‌-स्यासिना कायात्‌ पातयामास वै शिरः।
दुर्धरं दुर्मुखं चोभौ शरैर्‌-निन्ये यम-क्षयम्‌(**स्‌ स्वाहा**)॥२०

(**ह्लीं**) एवं संक्षीयमाणे तु स्वसैन्ये महिषासुरः।

माहिषेण स्वरूपेण त्रासयामास तान् गणान्(**स् स्वाहा**)॥२१

(**ह्रीं**) कांश्चित्-तुण्ड-प्रहारेण खुर-क्षेपैस्-तथापरान्।
लाङ्गूल-ताडितांश्-चान्यान् शृङ्गाभ्यां च विदारितान् (**स् स्वाहा**)॥

(**ह्रीं**) वेगेन कांश्चिद-परान्-नादेन भ्रमणेन च।
निश्-श्वास-पवने-नान्यान् पातयामास भूतले(**स् स्वाहा**)॥२३

(**ह्रीं**) निपात्य प्रमथा-नीक-मभ्य-धावत सोऽसुरः।
सिंहं हन्तुं महादेव्याक् कोपं चक्रे ततोऽम्बिका(**स् स्वाहा**)॥२४

(**ह्रीं**) सोऽपि कोपान्-महावीर्यख् खुर-क्षुण्ण-महीतलः।
शृङ्गाभ्यां पर्वता-नुच्चांश्-चिक्षेप च ननाद च(**स् स्वाहा**)॥२५

(**ह्रीं**) वेग-भ्रमण-विक्षुण्णा मही तस्य व्यशीर्-यत।
लाङ्गूलेना-हतश्-चाब्धिफ् प्लावयामास सर्वतः(**स् स्वाहा**)॥२६

(**ह्रीं**) धुत-शृङ्ग-विभिन्नाश्च खण्डं खण्डं ययुर्-घनाः।

श्वासा-निलास्तास् शतशो निपेतुर्-नभसोऽचलाः(**स्  स्वा॒हा॑**  )॥२७

(**ह्लीं**) इति क्रोध-समाध्मात-मापतन्तं महासुरम्।
दृष्ट्वा सा चण्डिका कोपं तद्-वधाय तदाकरोत्(**स्  स्वा॒हा॑**  )॥२८

(**ह्लीं**) सा क्षिप्त्वा तस्य वै पाशं तं बबन्ध महासुरम्।
तत्याज माहिषं रूपं सोऽपि बद्धो महा-मृधे(**स्  स्वा॒हा॑**  )॥२९

(**ह्लीं**) ततस् सिंहोऽभवत्-सद्यो यावत्-तस्याम्बिका शिरः।
छिनत्ति तावत् पुरुषख् खड्ग-पाणि-रदृश्यत(**स्  स्वा॒हा॑**  )॥३०

(**ह्लीं**) तत एवाशु पुरुषं देवी चिच्छेद सायकैः।
तं खड्ग-चर्मणा सार्धं ततस् सोऽभून्-महागजः(**स्  स्वा॒हा॑**  )॥३१

(**ह्लीं**) करेण च महा-सिंहं तं चकर्ष जगर्ज च।
कर्ष-तस्तु करं देवी खड्गेन निर-कृन्तत(**स्  स्वा॒हा॑**  )॥३२

(**ह्लीं**) ततो महासुरो भूयो माहिषं वपुरास्-स्थितः।

तथैव क्षोभयामास त्रैलोक्यं सच-राचरम्(**स्** **स्वाहा**)॥३३

(**ह्लीं**) ततक् क्रुद्धा जगन्माता चण्डिका पान-मुत्तमम्।
पपौ पुनफ् पुनश्-चैव जहासा-रुण-लोचना(**स्** **स्वाहा**)॥३४

(**ह्लीं**) ननर्द चासुरस् सोऽपि बल-वीर्य-मदोद्धतः।
विषाणाभ्यां च चिक्षेप चण्डिकां प्रति भूधरान्(**स्** **स्वाहा**)॥३५

(**ह्लीं**) सा च तान्-प्रहितांस्तेन चूर्णयन्ती शरोत्करैः।
उवाच तं मदोद्-धूत-मुख-रागा-कुलाक्षरम्(**स्** **स्वाहा**)॥३६

(**ह्लीं**) देव्युवाच(**स्** **स्वाहा**)॥३७

(**ह्लीं**) गर्ज गर्ज क्षणं मूढ मधु यावत्-पिबाम्यहम्।
मया त्वयि हतेऽत्रैव गर्जिष्यन्-त्याशु देवताः(**स्** **स्वाहा**)॥३ ८

(**ह्लीं**) ऋषिरुवाच(**स्** **स्वाहा**)॥३९

(ह्लीं) एव-मुक्त्वा समुत्पत्य सारूढा तं महासुरम्।
पादेनाक्रम्य कण्ठे च शूले-नैनम-ताडयत्(स् स्वा॒हा॑ )॥४०

(ह्लीं) ततस् सोऽपि पदाक्रान्तस्-तया निज-मुखात्ततः।
अर्ध-निष्क्रान्त एवासीद्-देव्या वीर्येण संवृतः(स् स्वा॒हा॑ )॥४१

(ह्लीं) अर्ध-निष्क्रान्त एवासौ युध्य-मानो महासुरः।
तया महासिना देव्या शिरश्-छित्वा निपातितः(स् स्वा॒हा॑ )॥४२

(ह्लीं) ततो हाहा-कृतं सर्वं दैत्य-सैन्यं ननाश तत्।
प्रहर्षं च परं जग्मुस् सकला देवता-गणाः(स् स्वा॒हा॑ )॥४३

(ह्लीं) तुष्टु-वुस्तां सुरा देवीं सह-दिव्यैर्-महर्षिभिः।
जगुर्-गन्धर्व-पतयो ननृतुश्-चाप्सरोगणाः (स् स्वा॒हा॑ )॥ ॐ॥ ४४

**Parayana Ghosham**

**स॒त्यास् सं॑न्तु यजं॑मानस्य॒ कामाः॑।**

नमो देव्यै महादेव्यै शिवायै सततं नमः।
नमफ् प्रकृत्यै भद्रायै नियताफ् प्रणतास् स्म ताम्॥

साङ्गायै सायुधायै सपरिवारायै सर्वात्मिकायै
अष्टा-विम्शति-वर्णात्मिकायै श्रीमहालक्ष्म्यै नमः ॥

**Homa Ghosham**

**स॒त्यास् सं॑न्तु॒ यजं॑मानस्य॒ कामाः॑।**

नमो देव्यै महादेव्यै शिवायै सततं नमः।
नमफ् प्रकृत्यै भद्रायै नियताफ् प्रणतास् स्म ताम्॥
साङ्गायै सायुधायै सपरिवारायै सर्वात्मिकायै
अष्टा-विम्शति-वर्णात्मिकायै श्रीमहालक्ष्म्यै
महाहुतिं समर्पयामि नमस् **स्वा॒हा॑** ॥ वौषट्॥

अष्टा-विम्शति-वर्णात्मिकायै श्रीमहालक्ष्म्यायिदन्नमम॥

## चतुर्थोध्यायः

ॐ (**ह्रीं**) ऋषिरुवाच(**स् स्वा॒हा॑** )॥१

(**ह्रीं**) शक्रादयस् सुरगणा निहतेऽति-वीर्ये-
तस्मिन्-दुरात्मनि सुरारिबले च देव्या।
तां तुष्टुवुप् प्रणति-नम्र-शिरोध-रांसा-

वाग्भिफ् प्रहर्ष-पुलकोद्-गम-चारुदेहाः(**स् स्वाहा**)॥२

(**ह्लीं**) देव्या यया ततमिदं जगदात्म-शक्त्या-
निश्-शेष-देवगण-शक्ति-समूह-मूर्त्या।
तामम्बिका-मखिल-देव-महर्षि-पूज्यां-
भक्त्या नतास् स्म विदधातु शुभानि सा नः(**स् स्वाहा**)॥३

(**ह्लीं**) यस्याफ् प्रभाव-मतुलं भगवाननन्तो-
ब्रह्मा हरश्च न हि वक्तुमलं बलं च।
सा चण्डिकाखिल-जगत्-परिपालनाय-
नाशाय चाशुभ-भयस्य मतिं करोतु(**स् स्वाहा**)॥४

(**ह्लीं**) या श्रीस् स्वयं सुकृतिनां भवनेष्व-लक्ष्मीफ्
पापात्मनां कृतधियां हृदयेषु बुद्धिः।
श्रद्धा सतां कुलजन-प्रभवस्य लज्जा-
तां त्वां नतास् स्म परिपालय देवि विश्वम्(**स् स्वाहा**)॥५

(**ह्लीं**) किं वर्णयाम तव रूप-मचिन्त्य-मेतत्-
किं-चाति-वीर्य-मसुरक्षय-कारि भूरि।
किं चाहवेषु चरितानि तवाद्-भुतानि-

सर्वेषु देव्य-सुरदेव-गणादिकेषु(**स् स्वाहा** )॥६

(**ह्रीं**) हेतुस् समस्त-जगतां त्रिगुणापि दोषैर्-
न ज्ञायसे हरिहरादिभि-रप्यपारा।
सर्वाश्रया-खिलमिदं जगदंश-भूतम्-
अव्या-कृता हि परमा प्रकृतिस्-त्वमाद्या(**स् स्वाहा** )॥७

(**ह्रीं**) यस्यास् समस्त-सुरता समु-दीरणेन-
तृप्तिं प्रयाति सकलेषु मखेषु देवि।
स्वाहा सि वै पितृ-गणस्य च तृप्ति-हेतु-
रुच्चार्यसे त्वमत एव जनैस् स्वधा च(**स् स्वाहा** )॥८

(**ह्रीं**) या मुक्ति-हेतु-रविचिन्त्य-महाव्रता त्वं-
अभ्यस्-यसे सुनिय-तेन्द्रिय-तत्वसारैः।
मोक्षार्थि-भिर्-मुनिभिरस्त-समस्त-दोषैर्-
विद्यासि सा भगवती परमा हि देवि(**स् स्वाहा** )॥९

(**ह्रीं**) शब्दात्मिका सुवि-मलर्ग्य-जुषां निधानम्-
उद्-गीथरम्य-पद-पाठवतां च साम्-नाम्।
देवी त्रयी भगवती भव-भावनाय-

वार्ता च सर्वजगतां परमार्ति-हन्त्री(**स्‌ स्वाहा**)॥१०

(**ह्लीं**) मेधासि देवि विदिता-खिल-शास्त्रसारा-
दुर्गासि दुर्ग-भवसागर-नौर-सङ्गा।
श्रीक् कैटभारि-हृदयैक-कृताधि-वासा-
गौरी त्वमेव शशि-मौलि-कृत-प्रतिष्ठा(**स्‌ स्वाहा**)॥११

(**ह्लीं**) ईषत्-सहास-ममलं परि-पूर्णचन्द्र-
बिम्बानुकारि कन-कोत्तम-कान्ति-कान्तम्।
अत्यद्-भुतं प्रहृत-मात्त-रुषा तथापि-
वक्त्रं विलोक्य सहसा महिषासुरेण(**स्‌ स्वाहा**)॥१२

(**ह्लीं**) दृष्ट्वा तु देवि कुपितं भ्रुकुटी-करालम्-
उद्यच्-छशाङ्क-सदृशच्-छवि यन्न सद्यः।
प्राणान् मुमोच महिषस्-तदतीव चित्रं-
कैर्-जीव्यते हि कुपितान्तक-दर्शनेन(**स्‌ स्वाहा**)॥१३

(**ह्लीं**) देवि प्रसीद परमा भवती भवाय-
सद्यो विनाशयसि कोपवती कुलानि।
विज्ञात-मेत-दधु-नैव यदस्त-मेतन्-

नीतं बलं सुवि-पुलं महिषासुरस्य(**स् स्वा॒हाँ** )॥१४

(**ह्रीं**) ते सम्मता जन-पदेषु धनानि तेषां-
तेषां यशांसि न च सीदति धर्म-वर्गः।
धन्यास्त एव निभृतात्मज-भृत्यदारा-
येषां सदाभ्यु-दयदा भवती प्रसन्ना(**स् स्वा॒हाँ** )॥१५

(**ह्रीं**) धर्म्यार्णि देवि सकलानि सदैव कर्माण्-
यत्या-दृतफ् प्रतिदिनं सुकृती करोति।
स्वर्गं प्रयाति च ततो भवती प्रसादात्-
लोक-त्रयेऽपि फलदा ननु देवि तेन(**स् स्वा॒हाँ** )॥१६

(**ह्रीं**) दुर्गे स्मृता हरसि भीति-मशेष-जन्तोस्-
स्वस्थैस् स्मृता मति-मतीव शुभां ददासि।
दारिद्र्य-दुःख-भयहारिणि का त्वदन्या-
सर्वोपकार-करणाय सदार्द्र-चित्ता(**स् स्वा॒हाँ** )॥१७

(**ह्रीं**) एभिर्-हतैर्-जगदु-पैति सुखं तथैते-
कुर्वन्तु नाम नरकाय चिराय पापम्।
सङ्ग्राम-मृत्यु-मधिगम्य दिवं प्रयान्तु-

मत्वेति नून-महितान्-विनि-हंसि देवि(**स् स्वाहा** )॥१८

(**ह्रीं**) दृष्ट्-वैव किं न भवती प्रकरोति भस्म-
सर्वासुरा-नरिषु यत्-प्रहिणोषि शस्त्रम्।
लोकान्-प्रयान्तु रिपवोऽपि हि शस्त्र-पूता-
इत्थं मतिर्-भवति तेष्वपि-तेऽति -साध्वी(**स् स्वाहा** )॥१९

(**ह्रीं**) खड्ग-प्रभा-निकर-विस्फुरणैस्-तथोग्रैश्-
शूलाग्र-कान्ति-निवहेन दृशोऽसुराणाम्।
यन्नागता विलय-मंशुम-दिन्दु-खण्ड-
योग्याननं तव विलोकयतां तदेतत्(**स् स्वाहा** )॥२०

(**ह्रीं**) दुर्वृत्त-वृत्त-शमनं तव देवि शीलं-
रूपं तथैतद-विचिन्त्यम-तुल्य-मन्यैः।
वीर्यं च हन्तृ हृत-देव-पराक्रमाणां-
वैरिष्वपि प्रकटि-तैव दया त्व-येत्थम्(**स् स्वाहा** )॥२१

(**ह्रीं**) केनोपमा भवतु तेऽस्य पराक्रमस्य-
रूपं च शत्रु-भय-कार्य-तिहारि कुत्र ।
चित्ते कृपा समर-निष्ठुरता च दृष्टा-

त्वय्येव देवि वरदे भुवनत्र-येऽपि(**स् स्वाहा** )॥२२

(**ह्लीं**) त्रैलोक्य-मेत-दखिलं रिपु-नाशनेन
त्रातं त्वया समर-मूर्धनि तेऽपि हत्वा।
नीता दिवं रिपुगणा भय-मप्य-पास्तम्
अस्माक-मुन्मद-सुरारिभवं नमस्ते (**स् स्वाहा** )॥२३

(**ह्लीं**) शूलेन पाहि नो देवि पाहि खड्गेन चाम्बिके।
घण्टास्वनेन नः पाहि चापज्या-निःस्वनेन च(**स् स्वाहा** )॥

(**ह्लीं**) प्राच्यां रक्ष प्रतीच्यां च चण्डिके रक्ष दक्षिणे।
भ्रामणेनात्म-शूलस्य उत्तरस्यां तथेश्वरि(**स् स्वाहा** )॥२५

(**ह्लीं**) सौम्यानि यानि रूपाणि त्रैलोक्ये विचरन्ति ते।
यानि चात्यर्थ-घोराणि तै रक्षास्-माम्स्-स्तथा भुवम्(**स् स्वाहा** )॥

(**ह्लीं**) खड्ग-शूल-गदादीनि यानि चास्त्राणि तेऽम्बिके।
कर-पल्लव-सङ्गीनि तैरस्मान्-रक्ष सर्वतः(**स् स्वाहा** )॥२७

(ह्रीं) ऋषिरुवाच(स् स्वाहा )॥२८

(ह्रीं) एवं स्तुता सुरैर्-दिव्यैक् कुसुमैर्-नन्दनोद्-भवैः।
अर्चिता जगतां धात्री तथा गन्धानु-लेपनैः(स् स्वाहा )॥२९

(ह्रीं) भक्त्या समस्तैस्-त्रिदशैर्-दिव्यैर्-धूपैस्तु धूपिता।
प्राह प्रसाद-सुमुखी समस्तान् प्रणतान् सुरान्(स् स्वाहा )॥३०

(ह्रीं) देव्युवाच(स् स्वाहा )॥३१

(ह्रीं) व्रियतां त्रिदशास् सर्वे यदस्-मत्तोऽभि-वाञ्छितम्(स् स्वाहा )॥

(ह्रीं) देवा ऊचुः(स् स्वाहा )॥३३

(ह्रीं) भगवत्या कृतं सर्वं न किञ्चिदव-शिष्यते(स् स्वाहा )॥३४

(ह्रीं) यदयं निहतश् शत्रु-रस्माकं महिषासुरः।
यदि चापि वरो देयस्-त्वयास्माकं महेश्वरि(स् स्वाहा )॥३५

(ह्रीं) संस्मृता संस्मृता त्वं नो हिंसेथाफ् परमापदः।
यश्च मर्त्यस् स्तवैरेभिस्-स्त्वां स्तोष्-यत्य-मलानने(स् स्वाहा )॥३६

(**ह्लीं**) तस्य वित्-तर्द्धि-विभवैर्-धनदारादि-सम्पदाम्।
वृद्ध-येऽस्मत्-प्रसन्ना त्वं भवेथास् सर्वदाम्बिके(**स्॒ स्वा॒हा॑**)॥३७

(**ह्लीं**) ऋषिरुवाच(**स्॒ स्वा॒हा॑**)॥३८

(**ह्लीं**) इति प्रसादिता देवैर्-जगतोऽर्थे तथात्मनः।
तथेत्-युक्त्वा भद्रकाली बभूवान्तर्-हिता नृप(**स्॒ स्वा॒हा॑**)॥३९

(**ह्लीं**) इत्येतत्-कथितं भूप सम्भूता सा यथा पुरा।
देवी देव-शरीरेभ्यो जगत्रय हितैषिणी(**स्॒ स्वा॒हा॑**)॥४०

(**ह्लीं**) पुनश्च गौरी-देहात्सा समुद्-भूता यथा-भवत्।
वधाय दुष्ट-दैत्यानां तथा शुम्भ-निशुम्भयोः(**स्॒ स्वा॒हा॑**)॥४१

(**ह्लीं**) रक्षणाय च लोकानां देवाना-मुप-कारिणी।
तच्-छृणुष्व मयाख्यातं यथावत्-कथयामि ते(**स्॒ स्वा॒हा॑**)॥ ह्लीं ॐ॥

**Parayana Ghosham**

**स॒त्यास् सं॑न्तु यजं॑मानस्य॒ कामाः॑।**

नमो देव्यै महादेव्यै शिवायै सततं नमः।
नमफ् प्रकृत्यै भद्रायै नियताफ् प्रणतास् स्म ताम्॥
साङ्गायै सायुधायै सपरिवारायै सर्वात्मिकायै
त्रि-वर्णात्मिकायै शक्ति-लक्ष्म्यै नमः ॥

**Homa Ghosham**

**स॒त्यास् सं॑न्तु यजं॑मानस्य॒ कामाः॑।**

नमो देव्यै महादेव्यै शिवायै सततं नमः।
नमफ् प्रकृत्यै भद्रायै नियताफ् प्रणतास् स्म ताम्॥
साङ्गायै सायुधायै सपरिवारायै सर्वात्मिकायै
त्रिवर्णात्मिकायै शक्ति-लक्ष्म्यै

महाहुतिं समर्पयामि नमस् **स्वा॒हा॑** ॥ वौषट्॥

त्रिवर्णात्मिकायै शक्ति-लक्ष्म्यायिदन्नमम॥

## पञ्चमोध्यायः

ॐ क्लीं ऋषिरुवाच(**स् स्वाहा** )॥१

(**क्लीं**) पुरा शुम्भ-निशुम्भाभ्या-मसुराभ्यां शचीपतेः।
त्रैलोक्यं यज्ञ-भागाश्च हृता मद-बलाश्रयात्(**स् स्वाहा** )॥२

(**क्लीं**) तावेव सूर्यतां तद्व-दधिकारं तथैन्दवम्।
कौबेर-मथ-याम्यं च चक्राते वरुणस्य च(**स् स्वाहा** )॥३

(**क्लीं**) तावेव पवनर्द्धिं च चक्रतुर्-वह्नि-कर्म च।
ततो देवा विनिर्-धूता भ्रष्ट-राज्याफ् पराजिताः(**स् स्वाहा** )॥४

(**क्लीं**) हृताधि-कारास्-त्रिदशास्-ताभ्यां सर्वे निराकृताः।
महासुराभ्यां तां देवीं संस्-मरन्त्य-पराजिताम् (**स् स्वाहा** )॥५

(**क्लीं**) तयास्माकं वरो दत्तो यथा-पत्सु स्मृता-खिलाः।
भवतां नाशयिष्यामि तत्-क्षणात्-परमापदः(**स् स्वाहा** )॥६

(**क्लीं**) इति कृत्वा मतिं देवा हिमवन्तं नगेश्वरम्।

जग्मुस्-तत्र ततो देवीं विष्णु-मायां प्रतुष्टुवुः(**स् स्वा॒हाँ** )॥७

(**क्लीं**) देवा ऊचुः(**स् स्वा॒हाँ** )॥८

(**क्लीं**) नमो देव्यै महादेव्यै शिवायै सततं नमः।
नमफ् प्रकृत्यै भद्रायै नियताफ् प्रणतास् स्म ताम्(**स् स्वा॒हाँ** )॥

(**क्लीं**) रौद्रायै नमो नित्यायै गौर्यै धात्र्यै नमो नमः।
ज्योत्स्नायै चेन्दुरूपिण्यै सुखायै सततं नमः(**स् स्वा॒हाँ** )॥१०
(**क्लीं**) कल्याण्यै प्रणतां वृद्ध्यै सिद्ध्यै कुर्मो नमो नमः।
नैरृत्यै भूभृतां लक्ष्म्यै शर्वाण्यै ते नमो नमः(**स् स्वा॒हाँ** )॥११

(**क्लीं**) दुर्गायै दुर्गपारायै सारायै सर्व-कारिण्यै।
ख्यात्यै तथैव कृष्णायै धूम्रायै सततं नमः(**स् स्वा॒हाँ** )॥१२

(**क्लीं**) अति-सौम्याति-रौद्रायै नतास्-तस्यै नमो नमः।
नमो जगत्-प्रतिष्ठायै देव्यै कृत्यै नमो नमः(**स् स्वा॒हाँ** )॥१३

(क्लीं) या देवी सर्वभूतेषु विष्णुमायेति शब्दिता।
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः॥ १४-१६

**(नमस्तस्यैस् स्वाहा ॥**

**क्लीं नमस्तस्यैस् स्वाहा ॥**

**क्लीं नमस्तयै नमो नमस् स्वाहा ॥)**

(क्लीं) या देवी सर्वभूतेषु चेतनेत्-त्यभि-धीयते।
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥ १७-१९

**(नमस्तस्यैस् स्वाहा ॥**

**क्लीं नमस्तस्यैस् स्वाहा ॥**

**क्लीं नमस्तयै नमो नमस् स्वाहा ॥)**

(क्लीं) या देवी सर्वभूतेषु बुद्धि रूपेण संस्थिता।
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः॥ २०-२२

**(नमस्तस्यैस् स्वाहा ॥**

**क्लीं नमस्तस्यैस् स्वाहा ॥**

**क्लीं नमस्तयै नमो नमस् स्वाहा ॥)**

(क्लीं) या देवी सर्वभूतेषु निद्रा रूपेण संस्थिता।
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः॥ २३-२५

**(नमस्तस्यैस् स्वाहा ॥**

**क्लीं नमस्तस्यैस् स्वाहा ॥**

**क्लीं नमस्तयै नमो नमस् स्वाहा ॥)**

(क्लीं) या देवी सर्वभूतेषु क्षुदा रूपेण संस्थिता।
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः॥ २६-२८

**(नमस्तस्यैस् स्वाहा ॥**

**क्लीं नमस्तस्यैस् स्वाहा ॥**

**क्लीं नमस्तयै नमो नमस् स्वाहा ॥)**

(क्लीं) या देवी सर्वभूतेषुछ् छाया रूपेण संस्थिता।
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः॥ २९-३१

**(नमस्तस्यैस् स्वाहा ॥**

**क्लीं नमस्तस्यैस् स्वाहा ॥**

**क्लीं नमस्तये नमो नमस् स्वा॒हा॑ ॥)**

(**क्लीं**) या देवी सर्वभूतेषु शक्ति रूपेण संस्थिता।
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः॥ ३२-३४

**(नमस्तस्यैस् स्वा॒हा॑ ॥**

**क्लीं नमस्तस्यैस् स्वा॒हा॑ ॥**

**क्लीं नमस्तये नमो नमस् स्वा॒हा॑ ॥)**

(**क्लीं**) या देवी सर्वभूतेषु तृष्णा रूपेण संस्थिता।
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः॥ ३५-३७

**(नमस्तस्यैस् स्वा॒हा॑ ॥**

**क्लीं नमस्तस्यैस् स्वा॒हा॑ ॥**

**क्लीं नमस्तये नमो नमस् स्वा॒हा॑ ॥)**

(**क्लीं**) या देवी सर्वभूतेषु क्षान्ति रूपेण संस्थिता।
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः॥ ३८-४०

**(नमस्तस्यैस् स्वा॒हा॑ ॥**

**क्लीं नमस्तस्यैस् स्वा॒हा॑ ॥**

**क्लीं नमस्तये नमो नमस् स्वा॒हा॑ ॥)**

(**क्लीं**) या देवी सर्वभूतेषु जाति रूपेण संस्थिता।
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः॥ ४१-४३

**(नमस्तस्यैस् स्वा॒हा॑ ॥**

**क्लीं नमस्तस्यैस् स्वा॒हा॑ ॥**

**क्लीं नमस्तये नमो नमस् स्वा॒हा॑ ॥)**

(**क्लीं**) या देवी सर्वभूतेषु लज्जा रूपेण संस्थिता।
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः॥ ४४-४६

**(नमस्तस्यैस् स्वा॒हा॑ ॥**

**क्लीं नमस्तस्यैस् स्वा॒हा॑ ॥**

**क्लीं नमस्तये नमो नमस् स्वा॒हा॑ ॥)**

(**क्लीं**) या देवी सर्वभूतेषु शान्ति रूपेण संस्थिता।
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः॥ ४७-४९

**(नमस्तस्यैस् स्वा॒हाँ ॥**

**क्लीं नमस्तस्यैस् स्वा॒हाँ ॥**

**क्लीं नमस्तये नमो नमस् स्वा॒हाँ ॥)**

(**क्लीं**) या देवी सर्वभूतेषु श्रद्धा रूपेण संस्थिता।
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः॥ ५०-५२

**(नमस्तस्यैस् स्वा॒हाँ ॥**

**क्लीं नमस्तस्यैस् स्वा॒हाँ ॥**

**क्लीं नमस्तये नमो नमस् स्वा॒हाँ ॥)**

(**क्लीं**) या देवी सर्वभूतेषु कान्ति रूपेण संस्थिता।
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः॥ ५३-५५

**(नमस्तस्यैस् स्वा॒हाँ ॥**

**क्लीं नमस्तस्यैस् स्वा॒हाँ ॥**

**क्लीं नमस्तये नमो नमस् स्वा॒हाँ ॥)**

(**क्लीं**) या देवी सर्वभूतेषु लक्ष्मी रूपेण संस्थिता।
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः॥ ५६-५८

**(नमस्तस्यैस् स्वाहा ॥**

**क्लीं नमस्तस्यैस् स्वाहा ॥**

**क्लीं नमस्तये नमो नमस् स्वाहा ॥)**

(**क्लीं**) या देवी सर्वभूतेषु वृत्ति रूपेण संस्थिता।
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः॥ ५९-६१

**(नमस्तस्यैस् स्वाहा ॥**

**क्लीं नमस्तस्यैस् स्वाहा ॥**

**क्लीं नमस्तये नमो नमस् स्वाहा ॥)**

(**क्लीं**) या देवी सर्वभूतेषु स्मृति रूपेण संस्थिता।
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः॥ ६२-६४

**(नमस्तस्यैस् स्वाहा ॥**

**क्लीं नमस्तस्यैस् स्वाहा ॥**

**क्लीं नमस्तये नमो नमस् स्वाहा ॥)**

(**क्लीं**) या देवी सर्वभूतेषु दया रूपेण संस्थिता।
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः॥ ६५-६७

**(नमस्तस्यैस् स्वा॒हा॑ ॥**

**क्लीं नमस्तस्यैस् स्वा॒हा॑ ॥**

**क्लीं नमस्तये नमो नमस् स्वा॒हा॑ ॥)**

(**क्लीं**) या देवी सर्वभूतेषु तुष्टि रूपेण संस्थिता।
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः॥ ६८-७०

**(नमस्तस्यैस् स्वा॒हा॑ ॥**

**क्लीं नमस्तस्यैस् स्वा॒हा॑ ॥**

**क्लीं नमस्तये नमो नमस् स्वा॒हा॑ ॥)**

(**क्लीं**) या देवी सर्वभूतेषु मातृ रूपेण संस्थिता।
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः॥ ७१-७३

**(नमस्तस्यैस् स्वा॒हा॑ ॥**

**क्लीं नमस्तस्यैस् स्वा॒हा॑ ॥**

**क्लीं नमस्तयै नमो नमस् स्वा॒हाँ ॥)**

(**क्लीं**) या देवी सर्वभूतेषु भ्रान्ति रूपेण संस्थिता।
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः॥ ७४-७६

**(नमस्तस्यैस् स्वा॒हाँ ॥**

**क्लीं नमस्तस्यैस् स्वा॒हाँ ॥**

**क्लीं नमस्तयै नमो नमस् स्वा॒हाँ ॥)**

(**क्लीं**) इन्द्रियाणा-मधिष्ठात्री भूतानां चाखिलेषु या।
भूतेषु सततं तस्यै व्याप्ति-देव्यै नमो नमः॥७७

(**क्लीं**) चितिरूपेण या कृत्स्न-मेतद् व्याप्य स्थिता जगत्
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः॥ ७८-८०

**(नमस्तस्यैस् स्वा॒हाँ ॥**

**क्लीं नमस्तस्यैस् स्वा॒हाँ ॥**

**क्लीं नमस्तयै नमो नमस् स्वा॒हाँ ॥)**

(**क्लीं**) स्तुता सुरैफ् पूर्व-मभीष्ट-संश्रयात्
तथा सुरेन्द्रेण दिनेषु सेविता।
करोतु सा नश् शुभ-हेतु-रीश्वरी
शुभानि भद्राण्यभि-हन्तु चापदः(**स् स्वाहा**)॥८१

(**क्लीं**) या साम्प्रतं चोद्धत-दैत्य-तापितै
रस्माभि-रीशा च सुरैर्-नमस्यते।
या च स्मृता तत्-क्षणमेव हन्ति नस्
सर्वापदो भक्ति-विनम्र-मूर्तिभिः(**स् स्वाहा**)॥८२

(**क्लीं**) ऋषिरुवाच(**स् स्वाहा**)॥८३

(**क्लीं**) एवं स्तवाभि-युक्तानां देवानां तत्र पार्वती।
स्नातु-मभ्या-ययौ तोये जाह्नव्या नृपनन्दन(**स् स्वाहा**)॥८४

(**क्लीं**) साब्रवीत्तान् सुरान् सुभ्रूर्-भवद्भिस् स्तूय-तेऽत्र का।
शरीर-कोश-तश्-चास्यास् समुद्-भूताब्-रवीच्-छिवा (**स् स्वाहा**)

(**क्लीं**) स्तोत्रं ममैतत्-क्रियते शुम्भ-दैत्य-निराकृतैः।

देवैस् समेतैस् समरे निशुम्भेन पराजितैः(**स् स्वाहा**)॥८६

(**क्लीं**) शरीर-कोशाद्-यद्-तस्याफ् पार्वत्या निस्-सृताम्बिका
कौशि-कीति समस्तेषु ततो लोकेषु गीयते(**स् स्वाहा**)॥८७

(**क्लीं**) तस्यां विनिर्-गतायां तु कृष्णाभूत्-सापि पार्वती।
कालिकेति समाख्याता हिमाचल-कृताश्रया(**स् स्वाहा**)॥८८

(**क्लीं**) ततोऽम्बिकां परं रूपं बिभ्राणां सुमनोहरम्।
ददर्श चण्डो-मुण्डश्च भृत्यौ शुम्भ-निशुम्भयोः(**स् स्वाहा**)॥८९

(**क्लीं**) ताभ्यां शुम्भाय चाख्याता साऽतीव सुमनोहरा।
काप्यास्ते स्त्री महाराज भासयन्ती हिमाचलम्(**स् स्वाहा**)॥९०

(क्लीं) नैव तादृक् क्वचिद्-रूपं दृष्टं केनचि-दुत्तमम्।
ज्ञायतां काप्यसौ देवी गृह्यतां चासुरेश्वर(**स् स्वाहा**)॥९१

(**क्लीं**) स्त्रीरत्न-मति-चार्वङ्गी द्योत-यन्ती दिशस्-त्विषा।

सा तु तिष्ठति दैत्येन्द्र तां भवान् द्रष्टु-मर्हति(**स् स्वा̱हाँ** )॥९२

(**क्लीं**) यानि रत्नानि मणयो गजाश्-वादीनि वै प्रभो।
त्रैलोक्ये तु समस्तानि साम्प्रतं भान्ति ते गृहे(**स् स्वा̱हाँ** )॥९३

(**क्लीं**) ऐरावतस् समानीतो गज-रत्नं पुरन्दरात्।
पारिजात-तरुश्चायं तथै-वोच्चैश्-श्रवा हयः(**स् स्वा̱हाँ** )॥९४

(**क्लीं**) विमानं हंस-संयुक्त-मेतत्-तिष्ठति तेऽङ्गणे।
रत्नभूत-मिहानीतं यदासीद्-वेधसोऽद्-भुतम्(**स् स्वा̱हाँ** )॥९५

(**क्लीं**) निधिरेष महापद्मस् समानीतो धनेश्वरात्।
किञ्जल्-किनीं ददौ चाब्धिर्-माला-मम्लान-पङ्कजाम् (**स् स्वा̱हाँ** )॥

(**क्लीं**) छत्रं ते वारुणं गेहे काञ्चनस्-त्रावि तिष्ठति।
तथायं स्यन्द-नवरो यफ् पुरासीत्-प्रजापतेः(**स् स्वा̱हाँ** )॥९७

(**क्लीं**) मृत्योरुत्-क्रान्तिदा नाम शक्तिरीश त्वया हृता।

पाशस् सलिल-राजस्य भ्रातुस्-तव परिग्रहे(स् स्वाहा )॥९८

(क्लीं) निशुम्भस्याब्धि-जाताश्च समस्ता रत्नजातयः।
वह्नि-रपि ददौ तुभ्य-मग्नि-शौचे च वाससी(स् स्वाहा )॥९९

(क्लीं) एवं दैत्येन्द्र रत्नानि समस्तान्-याहृतानि ते।
स्त्री-रत्न-मेषा कल्याणी त्वया कस्मान्न गृह्यते(स् स्वाहा )॥

(क्लीं) ऋषिरुवाच(स् स्वाहा )॥१०१
(क्लीं) निशम्येति वचस् शुम्भस् स तदा चण्ड-मुण्डयोः।
प्रेषयामास सुग्रीवं दूतं देव्या महासुरम्(स् स्वाहा )॥१०२

(क्लीं) इति चेति च वक्तव्या सा गत्वा वचनान्-मम।
यथा चाभ्येति सम्प्रीत्या तथा कार्यं त्वया लघु(स् स्वाहा )॥

(क्लीं) स तत्र गत्वा यत्रास्ते शैलोद्-देशेऽति-शोभने।
सा देवी तां ततफ् प्राह श्लक्ष्णं मधुरया गिरा(स् स्वाहा )॥१०४

(**क्लीं**) दूत उवाच(**स्‌ स्वा॒हाँ** )॥१०५

(**क्लीं**) देवि दैत्येश्वरस्‌ शुम्भस्‌-त्रैलोक्ये परमेश्वरः।
दूतोऽहं प्रेषितस्तेन त्वत्‌-सकाश-मिहागतः(**स्‌ स्वा॒हाँ** )॥१०६

(**क्लीं**) अव्या-हताज्ञस्‌ सर्वासु यस्‌ सदा देवयो-निषु।
निर्जिताखिल-दैत्यारिस्‌ स यदाह श्रृणुष्व तत्‌ (**स्‌ स्वा॒हाँ** )॥

(**क्लीं**) मम त्रैलोक्य-मखिलं मम देवा वशानुगाः।
यज्ञ-भागा-नहं सर्वा-नुपाश्‌-नामि पृथक्‌ पृथक्‌(**स्‌ स्वा॒हाँ** )॥

(**क्लीं**) त्रैलोक्ये वर-रत्नानि मम वश्यान्य-शेषतः।
तथैव गजरत्नं च हृत्वा देवेन्द्र-वाहनम्‌(**स्‌ स्वा॒हाँ** )॥१०९

(**क्लीं**) क्षीरोद-मथनोद्‌-भूत-मश्व-रत्नं ममामरैः।
उच्चैश्‌-श्रवस-संज्ञं तत्‌-प्रणिपत्य समर्पितम्‌(**स्‌ स्वा॒हाँ** )॥

(**क्लीं**) यानि चान्यानि देवेषु गन्धर्वेषूरगेषु च।

रत्नभूतानि भूतानि तानि मय्येव शोभने(**स् स्वाहा**)॥१११

(**क्लीं**) स्त्री-रत्न-भूतां त्वां देवि लोके मन्यामहे वयम्।
सा त्वमस्-मानुपागच्छ यतो रत्नभुजो वयम्(**स् स्वाहा**)॥११२

(**क्लीं**) मां वा ममानुजं वापि निशुम्भ-मुरु-विक्रमम्।
भज त्वं चञ्चला-पाङ्गि रत्नभूतासि वै यतः(**स् स्वाहा**)॥११३

(**क्लीं**) परमैश्वर्य-मतुलं प्राप्स्यसे मत्-परि-ग्रहात्।
एतद्-बुद्ध्या समा-लोच्य मत्-परिग्रहतां व्रज(**स् स्वाहा**)॥

(**क्लीं**) ऋषिरुवाच(**स् स्वाहा**)॥११५

(**क्लीं**) इत्युक्ता सा तदा देवी गम्भीरान्तस्-स्मिता जगौ।
दुर्गा भगवती भद्रा ययेदं धार्यते जगत्(**स् स्वाहा**)॥११६

(**क्लीं**) देव्युवाच(**स् स्वाहा**)॥११७

(**क्लीं**) सत्य-मुक्तं त्वया नात्र मिथ्या किञ्चित्-त्वयो-दितम्।
त्रैलोक्याधिपतिस् शुम्भो निशुम्भश्चापि तादृशः(**स् स्वाहा**)॥११८

(**क्लीं**) किं त्वत्र यत्-प्रतिज्ञातं मिथ्या तत्-क्रियते कथम्।
श्रूयता-मल्प-बुद्धित्वात्-प्रतिज्ञा या कृता पुरा(**स् स्वाहा**)॥११९

(**क्लीं**) यो मां जयति सङ्ग्रामे यो मे दर्पं व्यपोहति।
यो मे प्रतिबलो लोके स मे भर्ता भविष्यति(**स् स्वाहा**)॥१२०

(**क्लीं**) तदा-गच्छतु शुम्भोऽत्र निशुम्भो वा महासुरः।
मां जित्वा किं चिरेणात्र पाणिं गृह्णातु मे लघु(**स् स्वाहा**)॥१२१

(**क्लीं**) दूत उवाच(**स् स्वाहा**)॥१२२

(**क्लीं**) अव-लिप्तासि मैवं त्वं देवि ब्रूहि ममाग्रतः।
त्रैलोक्ये कफ् पुमांस्-तिष्ठे-दग्रे शुम्भ-निशुम्भयोः (**स् स्वाहा**)॥१२३

(**क्लीं**) अन्येषा-मपि दैत्यानां सर्वे देवा न वै युधि।

तिष्ठन्ति सम्मुखे देवि किं पुनस् स्त्री त्वमेकिका(**स् स्वाहा** )॥१२४

(**क्लीं**) इन्द्राद्यास् सकला देवास्-तस्थुर्-येषां न संयुगे।
शुम्भा-दीनां कथं तेषां स्त्री प्रयास्यसि सम्मुखम्(**स् स्वाहा** )॥१२५

(**क्लीं**) सा त्वं गच्छ मयै-वोक्ता पार्श्वं शुम्भ-निशुम्भयोः।
केशा-कर्षण-निर्धूत-गौरवा मा गमिष्यसि(**स् स्वाहा** )॥१२६

(**क्लीं**) देव्युवाच(**स् स्वाहा** )॥१२७
(**क्लीं**) एव-मेतद् बली शुम्भो निशुम्भश्चाति-वीर्यवान्।
किं करोमि प्रतिज्ञा मे यदना-लोचिता पुरा(**स् स्वाहा** )॥१२८

(**क्लीं**) स त्वं गच्छ मयोक्तं ते यदे-तत्-सर्व-मा-दृतः।
तदा-चक्ष्वा-सुरेन्द्राय स च युक्तं करोतु तत्॥१२९ ॥ ॐ ॥ (**स् स्वाहा**
क्लीं ॐ)

**Parayana Ghosham**

**स॒त्यास् सं॑न्तु॒ यज॑मानस्य॒ कामाः॑।**

नमो देव्यै महादेव्यै शिवायै सततं नमः।
नमफ् प्रकृत्यै भद्रायै नियताफ् प्रणतास् स्म ताम्॥
साङ्गायै सायुधायै सपरिवारायै सर्वात्मिकायै
विष्णु-मायादि-त्रयोविम्शति-देवतायै नमः ॥

**Homa Ghosham**

**स॒त्यास् संन्तु॒ यजंमानस्य॒ कामाँः।**

नमो देव्यै महादेव्यै शिवायै सततं नमः।
नमफ् प्रकृत्यै भद्रायै नियताफ् प्रणतास् स्म ताम्॥
साङ्गायै सायुधायै सपरिवारायै सर्वात्मिकायै
विष्णु-मायादि-त्रयोविम्शति-देवतायै
महाहुतिं समर्पयामि नमस् **स्वा॒हाँ** ॥ वौषट्॥

विष्णु-मायादि-त्रयोविम्शति-देवतायायिदन्नमम॥

## षष्ठोध्यायः

(**क्लीं**) ॐ ऋषिरुवाच(**स् स्वा॒हाँ** )॥१

(**क्लीं**) इत्या-कर्ण्य वचो देव्यास् स दूतो-ऽमर्ष-पूरितः।

समाचष्ट समागम्य दैत्य-राजाय विस्तरात्(**स् स्वाहाँ** )॥२

(**क्लीं**) तस्य दूतस्य तद्-वाक्य- माकर्ण्या-सुरराट् ततः।

सक्रोधफ् प्राह दैत्याना-मधिपं धूम्र-लोचनम्(**स् स्वाहाँ** )॥३

(**क्लीं**) हे धूम्र-लोचनाशु त्वं स्व-सैन्य-परिवारितः।

तामानय बलाद्-दुष्टां केशा-कर्षण- विह्वलाम्(**स् स्वाहाँ** )॥४

(**क्लीं**) तत्-परित्राणदक् कश्चिद्-यदि-वोत्तिष्ठ-तेऽपरः।

स हन्तव्योऽमरो वापि यक्षो गन्धर्व एव वा(**स् स्वाहाँ** )॥५

(**क्लीं**) ऋषिरुवाच(**स् स्वाहाँ** )॥६

(**क्लीं**) तेनाज्ञप्-तस्-ततश् शीघ्रं स दैत्यो धूम्र-लोचनः।

वृतस् षष्ट्या सहस्राणा-मसुराणां द्रुतं ययौ(**स् स्वाहाँ** )॥७

(**क्लीं**) स-दृष्ट्वा तां ततो देवीं तुहिनाचल-संस्थिताम्।

जगा-दोच्चैफ् प्रयाहीति मूलं शुम्भ-निशुम्भयोः(**स् स्वा॒हाँ** )॥८

(**क्लीं**) न चेत्-प्रीत्-याद्य भवती मद्-भर्तार-मुपैष्यति।
ततो बलान्-नयाम्येष केशा-कर्षण-विह्वलाम्(**स् स्वा॒हाँ** )॥९

(**क्लीं**) देव्युवाच(**स् स्वा॒हाँ** )॥१०

(**क्लीं**) दैत्येश्-श्वरेण प्रहितो बलवान्-बल-संवृतः।
बलान्-नयसि मामेवं ततक् किं ते करोम्यहम्(**स् स्वा॒हाँ** )॥११

(**क्लीं**) ऋषिरुवाच(**स् स्वा॒हाँ** )॥१२

(**क्लीं**) इत्युक्तस् सोऽभ्य-धावत्ता-मसुरो धूम्र-लोचनः।
हुं कारेणैव तं भस्म सा चकाराम्बिका ततः(**स् स्वा॒हाँ** )॥१३

(**क्लीं**) अथ क्रुद्धं महासैन्य-मसुराणां तथाम्बिका।
ववर्ष सायकैस्-तीक्ष्णैस्-तथा शक्ति-परश्वधैः(**स् स्वा॒हाँ** )॥१४

(**क्लीं**) ततो धुत-सटक् कोपात्-कृत्वा नादं सुभैरवम्।
पपाता-सुर-सेनायां सिंहो देव्यास् स्ववाहनः(**स् स्वा॒हा᳚** )॥१५

(**क्लीं**) कांश्चित्-कर-प्रहारेण दैत्या-नास्येन चापरान्।
आक्रम्य चाधरे-णान्यान् स-जघान महासुरान्(**स् स्वा॒हा᳚** )॥

(**क्लीं**) केषांचित्-पाटयामास नखैक् कोष्ठानि केसरी।
तथा तल-प्रहारेण शिरांसि कृतवान्-पृथक्(**स् स्वा॒हा᳚** )॥१७

(**क्लीं**) विच्छिन्न-बाहु-शिरसक् कृतास्तेन तथापरे।
पपौ च रुधिरं कोष्ठा-दन्येषां धुत-केसरः(**स् स्वा॒हा᳚** )॥१८

(**क्लीं**) क्षणेन तद्-बलं सर्वं क्षयं नीतं महात्मना।
तेन केसरिणा देव्या वाहने-नाति-कोपिना(**स् स्वा॒हा᳚** )॥१९

(**क्लीं**) श्रुत्वा तमसुरं देव्या निहतं धूम्र-लोचनम्।
बलं च क्षयितं कृत्स्नं देवी-केसरिणा ततः(**स् स्वा॒हा᳚** )॥२०

(**क्लीं**) चुकोप दैत्याधि-पतिस् शुम्भफ् प्रस्फुरि-ताधरः।

आज्ञा-पयामास च तौ चण्डमुण्डौ महासुरौ(**स् स्वाहा**)॥२१

(**क्लीं**) हे चण्ड हे मुण्ड बलैर्-बहुभिफ् परिवारितौ।
तत्र गच्छत गत्वा च सा समानीयतां लघु(**स् स्वाहा**)॥२२

(**क्लीं**) केशेष्वा-कृष्य बद्ध्वा वा यदि वस् संशयो युधि।
तदा-शेषा-युधैस् सर्वै-रसुरैर्-विनि-हन्यताम्(**स् स्वाहा**)॥

(**क्लीं**) तस्यां हतायां दुष्टायां सिंहे च विनिपातिते।
शीघ्र-मागम्यतां बद्ध्वा गृहीत्वा ताम-थाम्बिकाम्॥२४॥ ॐ॥ (**स्**

**स्वाहा**)

**Parayana Ghosham**

**सत्यास् सन्तु यजमानस्य कामाः।**

नमो देव्यै महादेव्यै शिवायै सततं नमः।
नमफ् प्रकृत्यै भद्रायै नियताफ् प्रणतास् स्म ताम्॥
साङ्गायै सायुधायै सपरिवारायै सर्वात्मिकायै
शताक्ष्यै धूम्राक्ष्यै नमः ॥

**स॒त्यास् सं॑न्तु॒ यजं॑मानस्य॒ कामाः॑।**

नमो देव्यै महादेव्यै शिवायै सततं नमः।
नमफ् प्रकृत्यै भद्रायै नियताफ् प्रणतास् स्म ताम्॥
साङ्गायै सायुधायै सपरिवारायै सर्वात्मिकायै
शताक्ष्यै धूम्राक्ष्यै

महाहुतिं समर्पयामि नमस् **स्वा॒हा॑** ॥ वौषट्॥

शताक्ष्यै धूम्राक्ष्यायिदन्नमम॥

## सप्तमोध्यायः

ॐ (**क्लीं**) ऋषिरुवाच(**स् स्वा॒हा॑** )॥१

(**क्लीं**) आज्ञप्-तास्ते ततो दैत्याश्-चण्डमुण्ड-पुरोगमाः।
चतु-रङ्ग-बलोपेता ययु-रभ्-युद्-यता-युधाः(**स् स्वा॒हा॑** )॥२

(**क्लीं**) ददृ-शुस्ते ततो देवी-मीषद्-धासां व्यवस्थिताम्।

सिंहस्-स्योपरि शैलेन्द्र-श‍ृङ्गे महति काञ्चने(**स् स्वा॒हाँ** )॥३

(**क्लीं**) ते दृष्ट्वा तां समा-दातु-मुद्यमं चक्रु-रुद्-दयताः।
आकृष्ट-चापासि-धरास्-तथान्ये तत्-समीपगाः(**स् स्वा॒हाँ** )॥ ४

(**क्लीं**) ततक् कोपं चका-रोच्चै-रम्बिका तानरीन्-प्रति।
कोपेन चास्या वदनं मषी-वर्णम-भूत्-तदा(**स् स्वा॒हाँ** )॥५

(**क्लीं**) भ्रुकुटी-कुटिलात्-तस्या ललाट-फलकाद्-द्रितम्
काली कराल-वदना विनिष्-क्रान्तासि-पाशिनी(**स् स्वा॒हाँ** )॥
(**क्लीं**) विचित्र-खट्-वाङ्ग-धरा नरमाला-विभूषणा।
द्वीपि-चर्म-परीधाना शुष्क-मांसाति-भैरवा(**स् स्वा॒हाँ** )॥७

(**क्लीं**) अति-विस्तार-वदना जिह्वा-ललन-भीषणा।
निमग्ना-रक्त-नयना नादा-पूरित-दिङ्-मुखा(**स् स्वा॒हाँ** )॥८

(**क्लीं**) सा वेगेनाभि-पतिता घात-यन्ती महासुरान्।
सैन्ये तत्र सुरारीणा-मभ-क्षयत तत्-बलम्(**स् स्वा॒हाँ** )॥९

(**क्लीं**) पार्ष्णि-ग्राहाङ्-कुश-ग्राहि -योध-घण्टा-समन्-वितान्
समादा-यैक-हस्तेन मुखे चिक्षेप वारणान्(**स् स्वा॒हा॑**)॥१०

(**क्लीं**) तथैव योधं तुरगै रथं सारथिना सह।
निक्षिप्य वक्त्रे दशनैश्-चर्वयन्-त्यति-भैरवम्(**स् स्वा॒हा॑**)॥

(**क्लीं**) एकं जग्राह केशेषु ग्रीवाया-मथ चापरम्।
पादे-नाक्रम्य चैवान्य-मुर-सान्यम-पोथयत्(**स् स्वा॒हा॑**)॥१२

(**क्लीं**) तैर्-मुक्तानि च शस्त्राणि महास्त्राणि तथासुरैः।
मुखेन जग्राह रुषा दशनैर्-मथि-तान्यपि(**स् स्वा॒हा॑**)॥१३

(**क्लीं**) बलिनां तद्-बलं सर्व-मसुराणां दुरात्मनाम्।
ममर्दा-भक्षयच्-चान्या-नन्यांश्चा-ताडयत्-तदा(**स् स्वा॒हा॑**)॥

(**क्लीं**) असिना निहताक् केचित्-केचित्-खट्वाङ्ग-ताडिताः
जग्मुर्-विनाश-मसुरा दन्ताग्रा-भिहतास्-तथा (**स् स्वा॒हा॑**)॥

(क्लीं) क्षणेन तद्-बलं सर्व-मसुराणां निपातितम्।

दृष्ट्वा चण्डोऽभि-दुद्राव तां काली-मति-भीषणाम् (**स्**  **स्वाहा** )॥

(क्लीं) शर-वर्षैर्-महा-भीमैर्-भीमाक्षीं तां महासुरः।

छादया-मास चक्रैश्च मुण्डः क्षिप्तैस् सहस्रशः(**स्**  **स्वाहा** )॥१७

(क्लीं) तानि चक्राण्य-नेकानि विशमानानि तन्मुखम्।

बभुर्-यथार्क-बिम्बानि सुबहूनि घनो-दरम्(**स्**  **स्वाहा** )॥१८

(क्लीं) ततो जहासा-तिरुषा भीमं भैरव-नादिनी।

काली कराल-वक्त्रान्तर्-दुर्दर्श-दशनोज्-ज्वला(**स्**  **स्वाहा** )॥

(क्लीं) उत्थाय च महासिंहं देवी चण्ड-मधावत।

गृहीत्वा चास्य केशेषु शिरस्-तेनासि-नाच्छिनत्(**स्**  **स्वाहा** )॥

(क्लीं) अथ मुण्डोऽभ्य-धावत्तां दृष्ट्वा चण्डं निपातितम्।

तमप्य-पातयद्-भूमौ सा खड्गा-भिहतं रुषा(**स्**  **स्वाहा** )॥२१

(क्लीं) हत-शेषं ततस् सैन्यं दृष्ट्वा चण्डं निपातितम्।

मुण्डं च सुमहा-वीर्यं दिशो भेजे भया-तुरम्(**स् स्वा॒हाँ** )॥२२

(**क्लीं**) शिरश्-चण्डस्य काली च गृहीत्वा मुण्डमेव च।
प्राह प्रचण्डाट्ट-हास-मिश्र-मभ्येत्य चण्डिकाम्(**स् स्वा॒हाँ** )॥

(**क्लीं**) मया तवा-त्रोप-हृतौ चण्डमुण्डौ महापशू।
युद्ध-यज्ञे स्वयं शुम्भं निशुम्भं च हनिष्यसि(**स् स्वा॒हाँ** )॥२४

(**क्लीं**) ऋषिरुवाच(**स् स्वा॒हाँ** )॥२५
(**क्लीं**) तावा-नीतौ ततो दृष्ट्वा चण्डमुण्डौ महासुरौ।
उवाच कालीं कल्याणी ललितं चण्डिका वचः(**स् स्वा॒हाँ** )॥२६

(**क्लीं**) यस्माच्-चण्डं च मुण्डं च गृहीत्वा त्वमु-पागता।
चामुण्डेति ततो लोके ख्याता देवी भविष्यसि(**स् स्वा॒हाँ** )॥२७ ॐ

**Parayana Ghosham**

**स॒त्यास् संन्तु॒ यजंमानस्॒ कामाँः।**

नमो देव्यै महादेव्यै शिवायै सततं नमः।
नमफ् प्रकृत्यै भद्रायै नियताफ् प्रणतास् स्म ताम्॥

साङ्गायै सायुधायै सपरिवारायै सर्वात्मिकायै
कर्पूर-बीजाधिष्ठात्र्यै काली-चामुण्डायै नमः ॥

**Homa Ghosham**

**स॒त्यास् सं॑न्तु यजं॑मानस्य॒ कामाँः।**

नमो देव्यै महादेव्यै शिवायै सततं नमः।
नमफ् प्रकृत्यै भद्रायै नियताफ् प्रणतास् स्म ताम्॥
साङ्गायै सायुधायै सपरिवारायै सर्वात्मिकायै
कर्पूर-बीजाधिष्ठात्र्यै काली-चामुण्डायै
महाहुतिं समर्पयामि नमस् **स्वा॒हाँ** ॥ वौषट्॥
कर्पूर-बीजाधिष्ठात्र्यै काली-चामुण्डायिदन्नमम॥

# अष्टमोध्यायः

ॐ (**क्लीं**) ऋषिरुवाच(**स् स्वा॒हाँ** )॥१

(**क्लीं**) चण्डे च निहते दैत्ये मुण्डे च विनि-पातिते।
बहु-लेषु च सैन्येषु क्षयि-तेष्-वसुरेश्वरः(**स् स्वा॒हाँ** )॥२

(**क्लीं**) ततक् कोप-पराधीन-चेतास् शुम्भफ् प्रतापवान्।
उद्योगं सर्व-सैन्यानां दैत्याना-मादि-देश ह(**स् स्वाहा**)॥३

(**क्लीं**) अद्य सर्व-बलैर्-दैत्याष् षडशीति-रुदायुधाः।
कम्बूनां चतुर-शीतिर्-निर्यान्तु स्वबलैर्-वृताः(**स् स्वाहा**)॥४

(**क्लीं**) कोटि-वीर्याणि पञ्चाश-दसुराणां कुलानि वै।
शतं कुलानि धौम्राणां निर्-गच्छन्तु ममाज्ञया(**स् स्वाहा**)॥५

(**क्लीं**) कालका दौर्-हृदा मौर्याक् काल-केयास्-तथा-सुराः।
युद्धाय सज्ञा निर्यान्तु आज्ञया त्वरिता मम(**स् स्वाहा**)॥६

(**क्लीं**) इत्या-ज्ञाप्या-सुरपतिस् शुम्भो भैरव-शासनः।
निर्जगाम महासैन्य-सहस्रैर्-बहुभिर्-वृतः(**स् स्वाहा**)॥७

(**क्लीं**) आयान्तं चण्डिका दृष्ट्वा तत्सैन्य-मति-भीषणम्।
ज्या-स्वनैफ् पूरयामास धरणी-गगनान्तरम्(**स् स्वाहा**)॥८

(**क्लीं**) ततस् सिंहो महानाद-मतीव कृतवान्-नृप।
घण्टा-स्वनेन तन्ना-दमम्बिका चोप-बृंहयत्(**स् स्वाहा** )॥९

(**क्लीं**) धनुर्-ज्या-सिंह-घण्टानां नादा-पूरित-दिङ्-मुखा।
निनादैर्-भीषणैक् काली जिङ्गे विस्तारि-तानना(**स् स्वाहा** )॥

(**क्लीं**) तं निनाद-मुप-शुत्य दैत्य-सैन्यैश्-चतुर्-दिशम्।
देवी सिंहस्-तथा काली सरोषैफ् परिवारिताः(**स् स्वाहा** )॥११

(**क्लीं**) एतस्मिन्-नन्तरे भूप विनाशाय सुरद्-विषाम्।
भवायामर-सिंहाना-मति-वीर्य-बलान्विताः(**स् स्वाहा** )॥१२

(**क्लीं**) ब्रह्मेश-गुह-विष्णूनां तथेन्द्रस्य च शक्तयः।
शरीरेभ्यो विनिष्-क्रम्य तद्-रूपैश्-चण्डिकां ययुः(**स् स्वाहा** )

(**क्लीं**) यस्य देवस्य यद्-रूपं यथा भूषण-वाहनम्।
तद्-वदेव हि तच्-छक्ति-रसुरान्-योद्धु-माययौ(**स् स्वाहा** )॥

(**क्लीं**) हंस-युक्त-विमानाग्रे साक्ष-सूत्र-कमण्डलुः।
आयाता ब्रह्मणस् शक्तिर्-ब्रह्माणी-साभि-धीयते(**स् स्वा॒हा᳚**)॥

(**क्लीं**) माहेश्वरी वृषारूढा त्रिशूल-वर-धारिणी।
महाहि-वलया प्राप्ता चन्द्र-रेखा-विभूषणा(**स् स्वा॒हा᳚**)॥१६

(**क्लीं**) कौमारी शक्ति-हस्ता च मयूर-वरवाहना।
योद्धु-मभ्याययौ दैत्या-नम्बिका गुह-रूपिणी(**स् स्वा॒हा᳚**)॥१७

(**क्लीं**) तथैव वैष्णवी शक्तिर्-गरुडोपरि संस्थिता।
शङ्ख-चक्र-गदा-शार्ङ्ग-खड्ग-हस्ताभ्यु-पाययौ(**स् स्वा॒हा᳚**)॥१८

(**क्लीं**) यज्ञ-वाराह-मतुलं रूपं या बिभ्रतो हरेः।
शक्तिस् साप्या-ययौ तत्र वाराहीं बिभ्रती तनुम्(**स् स्वा॒हा᳚**)॥

(**क्लीं**) नार-सिंही नृसिंहस्य बिभ्रती सदृशं वपुः।
प्राप्ता तत्र सटा-क्षेप-क्षिप्त-नक्षत्र-संहतिः(**स् स्वा॒हा᳚**)॥२०

(**क्लीं**) वज्र-हस्ता तथै-वैन्द्री गज-राजोपरि स्थिता।
प्राप्ता सहस्र-नयना यथा शक्रस्-तथैव सा(**स् स्वा॒हा॑** )॥२१

(**क्लीं**) ततफ् परि-वृतस्-ताभि-रीशानो देव-शक्तिभिः।
हन्यन्ता-मसुरास् शीघ्रं मम प्रीत्याह चण्डिकाम्(**स् स्वा॒हा॑** )॥

(**क्लीं**) ततो देवी-शरी-रात्तु विनिष्-क्रान्ताति-भीषणा।
चण्डिका शक्ति-रत्युग्रा शिवाशत-निनादिनी(**स् स्वा॒हा॑** )॥२३

(**क्लीं**) सा चाह धूम्र-जटिल-मीशान-मपराजिता।
दूत त्वं गच्छ भगवन् पार्श्वं शुम्भ-निशुम्भयोः(**स् स्वा॒हा॑** )॥२४

(**क्लीं**) ब्रूहि शुम्भं निशुम्भं च दानवा-वति-गर्वितौ।
ये चान्ये दानवास्-तत्र युद्धाय समु-पस्थिताः(**स् स्वा॒हा॑** )॥२५

(**क्लीं**) त्रैलोक्य-मिन्द्रो लभतां देवास् सन्तु हविर्-भुजः।
यूयं प्रयात पातालं यदि जीवितु-मिच्छथ(**स् स्वा॒हा॑** )॥२६

(**क्लीं**) बलावले-पादथ-चेद्-भवन्तो युद्ध-काङ्क्षिणः।

तदा-गच्छत तृप्यन्तु मच्छिवाफ् पिशितेन वः(**स् स्वा॒हाँ** )॥२७

(**क्लीं**) यतो नियुक्तो दौत्येन तया देव्या शिवस् स्वयम्।

शिव-दूतीति लोकेऽस्मिंस्-ततस् सा ख्याति-मागता(**स् स्वा॒हाँ** )॥

(**क्लीं**) तेऽपि शृत्वा वचो देव्याश् शर्वा-ख्यातं महासुराः।

अमर्षा-पूरिता जग्मुर्-यत्र कात्यायनी स्थिता(**स् स्वा॒हाँ** )॥

(**क्लीं**) ततफ् प्रथम-मेवाग्रे शर-शक्त्-यृष्टि-वृष्टिभिः।

ववर्षु-रुद्धता-मर्षास्तां देवी-ममरारयः(**स् स्वा॒हाँ** )॥३०

(**क्लीं**) सा च तान् प्रहितान् बाणाञ्-छूलशक्ति-परश्वधान्

चिच्छेद लीलयाध्मात-धनुर्-मुक्तैर्-महेषुभिः(**स् स्वा॒हाँ** )॥३१

(**क्लीं**) तस्या-ग्रतस्-तथा काली शूल-पात-विदारितान्।

खट्वाङ्ग-पोथि-तांश्-चारीन्-कुर्वती व्यचरत्-तदा (**स् स्वा॒हाँ** )॥

(**क्लीं**) कमण्डलु-जला-क्षेप-हत-वीर्यान् हतौजसः।

ब्रह्माणी चाक-रोच्-छत्रून्-येन येन स्म धावति(**स्‌ स्वाहा** )॥

(**क्लीं**) माहेश्वरी त्रिशूलेन तथा चक्रेण वैष्णवी।

दैत्याञ्-जघान कौमारी तथा शक्त्याति-कोपना(**स्‌ स्वाहा** )

(**क्लीं**) ऐन्द्री कुलिश-पातेन शतशो दैत्य-दानवाः।

पेतुर्-विदारिताफ् पृथ्व्यां रुधि-रौघ-प्रवर्षिणः(**स्‌ स्वाहा** )॥३५

(**क्लीं**) तुण्ड-प्रहार-विध्वस्ता दंष्ट्रा-ग्रक्षत-वक्षसः।

वाराह-मूर्त्या न्यपतंश्-चक्रेण च विदारिताः(**स्‌ स्वाहा** )॥३६

(**क्लीं**) नखैर्-विदारि-तांश्-चान्यान् भक्षयन्ती महासुरान्

नारसिंही चचाराजौ नादा-पूर्ण-दिगम्बरा(**स्‌ स्वाहा** )॥३७

(**क्लीं**) चण्डाट्ट-हासै-रसुराश् शिव-दूत्यभि-दूषिताः।

पेतुफ् पृथिव्यां पतितांस्-स्तांश्-चखा-दाथ सा तदा(**स्‌ स्वाहा** )॥

(**क्लीं**) इति मातृ-गणं क्रुद्धं मर्दयन्तं महासुरान्।
दृष्ट्-वाभ्यु-पायैर्-विविधैर्-नेशुर्-देवारि-सैनिकाः(**स् स्वाहा**)॥३९

(**क्लीं**) पलायन-परान्-दृष्ट्वा दैत्यान्-मातृगणार्-दितान्।
योद्धु-मभ्या-ययौ क्रुद्धो रक्तबीजो महासुरः(**स् स्वाहा**)॥४०

(**क्लीं**) रक्त-बिन्दुर्-यदा भूमौ पतत्-यस्य शरीरतः।
समुत्-पतति मेदिन्यां तत्-प्रमाणस्-तदासुरः(**स् स्वाहा**)॥४१

(**क्लीं**) युयुधे स गदापाणि-रिन्द्र-शक्त्या महासुरः।
ततश्-चैन्द्री स्व-वज्रेण रक्तबीज-मताडयत्(**स् स्वाहा**)॥४२

(**क्लीं**) कुलिशेना-हतस्याशु बहु सुस्राव शोणितम्।
समुत्-तस्-थुस्-ततो योधास्-तद्-रूपास्-तत्-पराक्रमाः(**स् स्वाहा**

(**क्लीं**) यावन्तफ् पति-तास्-तस्य शरीराद्-रक्त-बिन्दवः।
तावन्तफ् पुरुषा जातास्-तद्-वीर्य-बलविक्रमाः(**स् स्वाहा**)॥४४

(**क्लीं**) ते चापि युयु-धुस्-तत्र पुरुषा रक्त-सम्भवाः।
समं मातृभि-रत्युग्र-शस्त्र-पातातिभीषणम्(**स् स्वाहा**)॥४५

(**क्लीं**) पुनश्च वज्र-पातेन क्षत-मस्य शिरो यदा।
ववाह रक्तं पुरुषास्-ततो जातास् सहस्रशः(**स् स्वाहा**)॥४६

(**क्लीं**) वैष्णवी समरे चैनं चक्रेणाभि-जघान ह।
गदया ताडयामास ऐन्द्री तम-सुरेश्वरम्(**स् स्वाहा**)॥४७

(**क्लीं**) वैष्णवी-चक्र-भिन्नस्य रुधिरस्-राव-सम्भवैः।
सहस्रशो जगद्-व्याप्तं तत्-प्रमाणैर्-महासुरैः(**स् स्वाहा**)॥४८

(**क्लीं**) शक्त्या जघान कौमारी वाराही च तथा-सिना।
माहेश्वरी त्रिशूलेन रक्तबीजं महासुरम्(**स् स्वाहा**)॥४९

(**क्लीं**) स चापि गदया दैत्यः सर्वा एवा-हनत् पृथक्।
मातृः कोप-समा-विष्टो रक्तबीजो महासुरः(**स् स्वाहा**)॥५०

(**क्लीं**) तस्या-हतस्य बहुधा शक्ति-शूलादि-भिर्-भुवि।

पपात यो वै रक्तौघस्-तेना-सञ्छत-शोऽसुराः (**स्** **स्वा॒हा॑** )॥

(**क्लीं**) तैश्-चासुरा-सृक्-सम्भूतै-रसुरैस् सकलं जगत्।
व्याप्त-मासीत्-ततो देवा-भयमा-जग्मु-रुत्तमम्(**स्** **स्वा॒हा॑** )॥

(**क्लीं**) तान् विषण्णान् सुरान् दृष्ट्वा चण्डिका प्राह-सत्वरा
उवाच कालीं चामुण्डे विस्तीर्णं वदनं कुरु(**स्** **स्वा॒हा॑** )॥५३

(**क्लीं**) मच्-छस्त्र-पात-सम्भूतान् रक्त-बिन्दून् महासुरान् ।
रक्त-बिन्दोफ् प्रतीच्छ त्वं वक्त्रे-णानेन वेगिना(**स्** **स्वा॒हा॑** )॥

(**क्लीं**) भक्षयन्ती चर रणे तदुत्-पन्नान्-महासुरान्।
एवमेष क्षयं दैत्यः **क्षी**णरक्तो गमिष्यति(स् **स्वा॒हा॑** )॥५५

(**क्लीं**) भक्ष्य-माणास्-त्वया चोग्रा न चोत्-पत्-स्यन्ति चापरे।
इत्-युक्त्वा तां ततो देवी शूलेनाभि-जघान तम्(**स्** **स्वा॒हा॑** )॥

(**क्लीं**) मुखेन काली जगृहे रक्तबीजस्य शोणितम्।

ततोऽसावा-जघानाथ गदया तत्र चण्डिकाम्(**स् स्वा॒हाँ** )॥५७

(**क्लीं**) न चास्या वेदनां चक्रे गदा-पातोऽल्पिकामपि।
तस्या-हतस्य देहात्तु बहु सुस्राव शोणितम्(**स् स्वा॒हाँ** )॥५८

(**क्लीं**) यतस्-ततस्-तद्-वक्त्रेण चामुण्डा सम्प्रतीच्छति।
मुखे समुद्गता येऽस्या रक्तपातान्-महासुराः(**स् स्वा॒हाँ** )॥५९

(**क्लीं**) तांश्-चखादाथ चामुण्डा पपौ तस्य च शोणितम्।
देवी शूलेन वज्रेण बाणै-रसिभि-ऋष्टिभिः(**स् स्वा॒हाँ** )॥६०

(**क्लीं**) जघान रक्तबीजं तं चामुण्डा-पीत-शोणितम्।
स पपात मही-पृष्ठे शस्त्र-सङ्घ-समाहतः(**स् स्वा॒हाँ** )॥६१

(**क्लीं**) नीरक्तश्च महीपाल रक्तबीजो महासुरः।
ततस्ते हर्ष-मतुल-मवापुस्त्रि-दशा नृप(**स् स्वा॒हाँ** )॥६२

(**क्लीं**) तेषां मातृगणो जातो ननर्ता-सृङ्-मदोद्धतः(**स् स्वा॒हाँ** )॥ ६३ॐ

**Parayana Ghosham**

**स॒त्यास्॑ सं॑न्तु॒ यजं॑मानस्य॒ कामाँ॑ः।**

नमो देव्यै महादेव्यै शिवायै सततं नमः।
नमफ् प्रकृत्यै भद्रायै नियताफ् प्रणतास् स्म ताम्॥
साङ्गायै सायुधायै सपरिवारायै सर्वात्मिकायै
अष्ट-मातृका-सहितायै रक्ताक्ष्यै नमः ॥

**Homa Ghosham**

**स॒त्यास्॑ सं॑न्तु॒ यजं॑मानस्य॒ कामाँ॑ः।**

नमो देव्यै महादेव्यै शिवायै सततं नमः।
नमफ् प्रकृत्यै भद्रायै नियताफ् प्रणतास् स्म ताम्॥
साङ्गायै सायुधायै सपरिवारायै सर्वात्मिकायै
अष्ट-मातृका-सहितायै रक्ताक्ष्यै

महाहुतिं समर्पयामि नमस् **स्वा॒हाँ॑** ॥ वौषट्॥

अष्ट-मातृका-सहितायै रक्ताक्ष्यायिदन्नमम॥

# नवमोध्यायः

ॐ(**क्लीं**) राजोवाच(**स्‌ स्वाहा**)॥१

(**क्लीं**) विचित्र-मिद-माख्यातं भगवन्‌ भवता मम।
देव्याश्‌-चरित-माहात्म्यं रक्तबीज-वधा-श्रितम्‌(**स्‌ स्वाहा**)॥२

(**क्लीं**) भूयश्‌-चेच्छाम्यहं श्रोतुं रक्तबीजे निपातिते।
चकार शुम्भो यत्कर्म निशुम्भश्‌-चाति-कोपनः(**स्‌ स्वाहा**)॥३

(**क्लीं**) ऋषिरुवाच(**स्‌ स्वाहा**)॥४

(**क्लीं**) चकार कोप-मतुलं रक्तबीजे निपातिते।
शुम्भासुरो निशुम्भश्च हतेष्‌-वन्येषु चाहवे(**स्‌ स्वाहा**)॥५

(**क्लीं**) हन्यमानं महासैन्यं विलोक्या-मर्ष-मुद्‌-वहन्‌।
अभ्य-धावन्‌-निशुम्भोऽथ मुख्य-यासुर-सेनया(**स्‌ स्वाहा**)॥६

(**क्लीं**) तस्या-ग्रतस्-तथा पृष्ठे पार्श्व-योश्च महासुराः।
संदष्-टौष्ठ-पुटाक् क्रुद्धा हन्तुं देवी-मुपाययुः(**स् स्वाहा॑**)॥७

(**क्लीं**) आजगाम महा-वीर्यश् शुम्भोऽपि स्वबलैर्-वृतः।
निहन्तुं चण्डिकां कोपात्-कृत्वा युद्धं तु मातृभिः(**स् स्वाहा॑**)॥८

(**क्लीं**) ततो युद्ध-मती-वासीद्-देव्या शुम्भ-निशुम्भयोः।
शर-वर्ष-मती-वोग्रं मेघ-योरिव वर्षतोः(**स् स्वाहा॑**)॥९

(**क्लीं**) चिच्छेदात् -ताञ्छरान्-ताभ्यां चण्डिका स्वश-रोत्करैः।
ताड-यामास चाङ्गेषु शस्त्रौघै-रसुरेश्वरौ(**स् स्वाहा॑**)॥१०

(**क्लीं**) निशुम्भो निशितं खड्गं चर्म चादाय सुप्रभम्।
अताडयन्-मूर्ध्नि सिंहं देव्या वाहन-मुत्तमम्(**स् स्वाहा॑**)॥११

(**क्लीं**) ताडिते वाहने देवी क्षुर-प्रेणासि-मुत्तमम्।
निशुम्भस्याशु चिच्छेद चर्म चाप्यष्ट-चन्द्रकम्(**स् स्वाहा॑**)॥१२

(**क्लीं**) छिन्ने चर्मणि खड्गे च शक्तिं चिक्षेप सोऽसुरः।

तामप्-यस्य द्विधा चक्रे चक्रेणाभि-मुखा-गताम्(**स् स्वाहा** )॥

(**क्लीं**) कोपाध्-मातो निशुम्भोऽथ शूलं जग्राह दानवः।
आयातं मुष्टि-पातेन देवी तच्-चाप्य-चूर्णयत्(**स् स्वाहा** )॥१४

(**क्लीं**) आविध्याथ गदां सोऽपि चिक्षेप चण्डिकां प्रति।
सापि देव्यास् त्रिशूलेन भिन्ना भस्मत्व-मागता(**स् स्वाहा** )॥१५

(**क्लीं**) ततफ् परशु-हस्तंत-मायान्तं दैत्य-पुङ्गवम्।
आहत्य देवी बाणौघै-रपात-यत भूतले(**स् स्वाहा** )॥१६

(**क्लीं**) तस्मिन्-निपतिते भूमौ निशुम्भे भीम-विक्रमे।
भ्रातर्-यतीव संक्रुद्धफ् प्रययौ हन्तु-मम्बिकाम्(**स् स्वाहा** )॥

(**क्लीं**) स रथस्-थस्-तथात्-त्युच्चैर्-गृहीत-परमायुधैः।
भुजै-रष्टाभि-रतुलैर्-व्याप्या-शेषं बभौ नभः(**स् स्वाहा** )॥१८

(**क्लीं**) तमा-यान्तं समा-लोक्य देवी शङ्ख-मवादयत्।

ज्या-शब्दं चापि धनुषश्-चकारा-तीव दुस्सहम्(**स् स्वाहा**)॥

(**क्लीं**) पूरया-मास ककुभो निज-घण्टास्-स्वनेन च।
समस्त-दैत्य-सैन्यानां तेजो-वध-विधायिना(**स् स्वाहा**)॥२०

(**क्लीं**) ततस् सिंहो महानादैस्-त्याजि-तेभ-महामदैः।
पूरया-मास गगनं गां तथैव दिशो दश(**स् स्वाहा**)॥२१

(**क्लीं**) ततक् कालीं समुत्-पत्य गगनं क्ष्माम-ताडयत्।
कराभ्यां तन्नि-नादेन प्राक्-स्वनास्ते तिरोहिताः(**स् स्वाहा**)॥

(**क्लीं**) अट्टाट्ट-हास-मशिवं शिवदूती चकार ह।
वैश् शब्दै-रसुरास्-त्रेसुश् शुम्भक् कोपं परं ययौ(**स् स्वाहा**)॥

(**क्लीं**) दुरात्मंस्-तिष्ठ तिष्ठेति व्याज-हाराम्बिका यदा।
तदा जयेत्य-भिहितं देवै-राकाश-संस्थितैः(**स् स्वाहा**)॥२४

(**क्लीं**) शुम्भे-नागत्य या शक्तिर्-मुक्ता ज्वालाति-भीषणा।

आयान्ती वह्नि-कूटाभा सा निरस्ता महोल्कया(**स्‌ स्वा॒हाँ** )॥२५

(**क्लीं**) सिंह-नादेन शुम्भस्य व्याप्तं लोक-त्रयान्तरम्।
निर्घात-निस्-स्वनो घोरो जितवान-वनीपते(**स्‌ स्वा॒हाँ** )॥२६

(**क्लीं**) शुम्भ-मुक्ताञ्छरान्-देवी शुम्भस्तत्-पहिताञ्छरान्
चिच्छेद स्वशरै-रुग्रैश् शत-शोऽथ सहस्रशः(**स्‌ स्वा॒हाँ** )॥२७

(**क्लीं**) ततस् सा चण्डिका क्रुद्धा शूलेनाभि-जघान तम्।
स तदाभि-हतो भूमौ मूर्च्छितो निप-पात ह(**स्‌ स्वा॒हाँ** )॥२८

(**क्लीं**) ततो निशुम्भस् सम्प्राप्य चेतना-मात्त-कार्मुकः।
आजघान शरैर्-देवीं कालीं केसरिणं तथा(**स्‌ स्वा॒हाँ** )॥२९

(**क्लीं**) पुनश्च कृत्वा बाहूना-मयुतं दनु-जेश्वरः।
चक्रा-युधेन दितिजश्-छादया-मास चण्डिकाम्(**स्‌ स्वा॒हाँ** )॥

(**क्लीं**) ततो भगवती क्रुद्धा दुर्गा दुर्गार्ति-नाशिनी।

चिच्छेद तानी चक्राणि स्वशरैस् सायकांश्च तान्(**स् स्वा॒हा॑** )॥

(**क्लीं**) ततो निशुम्भो वेगेन गदा-मादाय चण्डिकाम्।
अभ्य-धावत वै हन्तुं दैत्य- सेना-समावृतः(**स् स्वा॒हा॑** )॥३२

(**क्लीं**) तस्या-पतत एवाशु गदां चिच्छेद चण्डिका।
खड्गेन शित-धारेण स च शूलं समाददे(**स् स्वा॒हा॑** )॥३३

(**क्लीं**) शूल-हस्तं समा-यान्तं निशुम्भ-ममरार्-दनम्।
हृदि विव्याध शूलेन वेगा-विद्धेन चण्डिका(**स् स्वा॒हा॑** )॥३४

(**क्लीं**) भिन्नस्य तस्य शूलेन हृदयान्-निस्-सृतोऽपरः।
महाबलो महा-वीर्यस्-तिष्ठेति पुरुषो वदन्(**स् स्वा॒हा॑** )॥३५

(**क्लीं**) तस्य निष्-क्रामतो देवी प्रहस्य स्वन-वत्-ततः।
शिरश्-चिच्छेद खड्गेन ततोऽसाव-पतद्-भुवि(**स् स्वा॒हा॑** )॥३६

(**क्लीं**) ततस् सिंहश्-चखा-दोग्र-दंष्ट्रा-क्षुण्ण-शिरोधरान्।

असुरांस्-तां-स्तथा काली शिवदूती तथापरान्(**स्<u>स्वा</u>हाँ**)॥

(**क्लीं**) कौमारी-शक्ति-निर्भिन्नाक् केचिन्-नेशुर्-महासुराः।
ब्रह्माणी-मन्त्र-पूतेन तोये-नान्ये निरा-कृताः(**स्<u>स्वा</u>हाँ**)॥३८

(**क्लीं**) माहेश्वरी-त्रिशूलेन भिन्नाफ् पेतुस्-तथापरे।
वाराही-तुण्ड-घातेन केचिच्-चूर्णी-कृता भुवि(**स्<u>स्वा</u>हाँ**)॥

(**क्लीं**) खण्डं खण्डं च चक्रेण वैष्णव्या दानवाक् कृताः।
वज्रेण चैन्द्री-हस्ताग्र-विमुक्तेन तथापरे(**स्<u>स्वा</u>हाँ**)॥४०

(**क्लीं**) केचिद्-विनेशु-रसुराक् केचिन्-नष्टा महा-हवात्।
भक्षि-ताश्-चापरे काली-शिवदूती-मृगाधिपैः(**स्<u>स्वा</u>हाँ**)॥ ॐ॥ ४१

**Parayana Ghosham**

**सत्यास् संन्तु यजंमानस्य कामाः।**

नमो देव्यै महादेव्यै शिवायै सततं नमः।
नमफ् प्रकृत्यै भद्रायै नियताफ् प्रणतास् स्म ताम्॥
साङ्गायै सायुधायै सपरिवारायै सर्वात्मिकायै
वाग्भवबीजा-धिष्ठात्र्यै श्रीमहाकाल्यै नमः ॥

**स॒त्यास् सं॑न्तु॒ यजं॑मानस्य॒ कामाः॑।**

नमो देव्यै महादेव्यै शिवायै सततं नमः।
नमफ् प्रकृत्यै भद्रायै नियताफ् प्रणतास् स्म ताम्॥
साङ्गायै सायुधायै सपरिवारायै सर्वात्मिकायै
वाग्भवबीजा-धिष्ठात्र्यै श्रीमहाकाल्यै
महाहुतिं समर्पयामि नमस् **स्वा॒हा॑** ॥ वौषट्॥

वाग्भवबीजा-धिष्ठात्र्यै श्रीमहाकाल्यायिदन्नमम॥

## दशमोध्यायः

ॐ (**क्लीं**) ऋषिरुवाच(**स् स्वा॒हा॑** )॥१

(**क्लीं**) निशुम्भं निहतं दृष्ट्वा भ्रातरं प्राण-सम्मितम्।
हन्यमानं बलं चैव शुम्भक् क्रुद्धो-ऽब्रवीद्-वचः(**स् स्वा॒हा॑** )॥२

(**क्लीं**) बला-वलेपा-दुष्टे त्वं मा दुर्गे गर्व-मावह।

अन्यासां बल-माश्रित्य युद्ध्यसे याति-मानिनी(**स्** **स्वा॒हा॑** )॥३

(**क्लीं**) देव्युवाच(**स्** **स्वा॒हा॑** )॥४

(**क्लीं**) एकै-वाहं जगत्-यत्र द्वितीया का ममापरा।
पश्यैता दुष्ट मय्येव विशन्त्यो मद्-विभूतयः(**स्** **स्वा॒हा॑** )॥५

(**क्लीं**) ततस् समस्-तास्ता देव्यो ब्रह्माणी-प्रमुखा लयम्।
तस्या देव्या-स्तनौ जग्मु-रेकै-वासीत्-तदाम्बिका(**स्** **स्वा॒हा॑** )॥

(**क्लीं**) देव्युवाच(**स्** **स्वा॒हा॑** )॥७

(**क्लीं**) अहं विभूत्या बहुभि-रिह रूपैर्-यदा-स्थिता।
तत्-संहृतं मयै-कैव तिष्ठाम्-याजौ स्थिरो भव(**स्** **स्वा॒हा॑** )॥८

(**क्लीं**) ऋषिरुवाच(स् **स्वा॒हा॑** )॥९

(**क्लीं**) ततफ् प्रव-वृते युद्धं देव्यास् शुम्भस्य चोभयोः।

पश्यतां सर्व-देवाना-मसुराणां च दारुणम्(**स् स्वा॒हा॑**)॥१०

(**क्लीं**) शर-वर्षैश् शितैश् शस्त्रैस्-तथास्-त्रैश्-चैव दारुणैः।
तयोर्-युद्ध-मभूद्-भूयस् सर्व-लोक-भयङ्करम्(**स् स्वा॒हा॑**)॥

(**क्लीं**) दिव्यान्-यस्त्राणि शतशो मुमुचे यान्य-थाम्बिका।
बभञ्ज तानि दैत्येन्द्रस्-तत्-प्रती-घात-कर्तृ-भिः(**स् स्वा॒हा॑**)॥

(**क्लीं**) मुक्तानि तेन चास्त्राणि दिव्यानि परमेश्वरी।
बभञ्ज लील-यैवोग्र-हुङ्कारोच्-चार-णादिभिः(**स् स्वा॒हा॑**)॥१३

(**क्लीं**) ततश् शर-शतैर्-देवी-माच्छा-दयत सोऽसुरः।
सापि तत्-कुपिता देवी धनुश्-चिच्छेद चेषुभिः(**स् स्वा॒हा॑**)॥१४

(**क्लीं**) छिन्ने धनुषि दैत्येन्द्रस्-तथा शक्ति-मथा-ददे।
चिच्छेद देवी चक्रेण तामप्-यस्य करे स्थिताम्(**स् स्वा॒हा॑**)॥१५

(**क्लीं**) ततख् खड्ग-मुपादाय शत-चन्द्रं च भानुमत्।

अभ्यधा-वत्-तदा देवीं दैत्याना-मधि-पेश्वरः(**स् स्वा॒हाँ** )॥१६

(**क्लीं**) तस्या-पतत एवाशु खड्गं चिच्छेद चण्डिका।
धनुर्-मुक्तैश् शितैर्-बाणैश्-चर्म चार्क-करा-मलम् (**स् स्वा॒हाँ** )॥

(**क्लीं**) हताश्वस् स तदा दैत्यश्-छिन्न-धन्वा विसारथिः।
जग्राह मुद्गरं घोर-मम्बिका-निध-नोद्-यतः(**स् स्वा॒हाँ** )॥१८

(**क्लीं**) चिच्छेदा-पत-तस्-तस्य मुद्गरं निशितैश् शरैः।
तथापि सोऽभ्य-धावत्तां मुष्टि-मुद्यम्य वेगवान्(**स् स्वा॒हाँ** )॥१९

(**क्लीं**)स मुष्टिं पातया-मास हृदये दैत्य-पुङ्गवः।
देव्यास्तं चापि सा देवी तले-नोरस्य-ताडयत्(**स् स्वा॒हाँ** )॥२०

(**क्लीं**) तल-प्रहा-राभि-हतो निपपात महीतले।
स दैत्य-राजस् सहसा पुनरेव तथोत्-थितः(**स् स्वा॒हाँ** )॥२१

(**क्लीं**) उत्पत्य च प्रगृह्-ह्योच्-चैर्-देवीं गगन-मास्थितः।

तत्रापि सा निरा-धारा युयुधे तेन चण्डिका(**स् स्वाहा**)॥२२

(**क्लीं**) नियुद्धं खे तदा दैत्यश्-चण्डिका च परस्परम्।
चक्रतुफ् प्रथमं सिद्ध-मुनि-विस्मय-कारकम्(**स् स्वाहा**)॥२३

(**क्लीं**) ततो नियुद्धं सुचिरं कृत्वा तेनाम्बिका सह।
उत्-पात्य भ्राम-यामास चिक्षेप धरणी-तले(**स् स्वाहा**)॥२४

(**क्लीं**) स क्षिप्तो धरणीं प्राप्य मुष्टि-मुद्यम्य वेगितः।
अभ्य-धावत दुष्टात्मा चण्डिका-निधनेच्छया(**स् स्वाहा**)॥२५

(**क्लीं**) तमा-यान्तं ततो देवी सर्व-दैत्य-जनेश्वरम्।
जगत्यां पात-यामास भित्वा शूलेन वक्षसि(**स् स्वाहा**)॥२६

(**क्लीं**) स गतासुफ् पपा-तोर्व्यां देवी शूलाग्र-विक्षतः।
चालयन् सकलां पृथ्वीं साब्धि-द्वीपां सपर्वताम्(**स् स्वाहा**)॥

(**क्लीं**) ततफ् प्रसन्न-मखिलं हते तस्मिन् दुरात्मनि।

जगत्-स्वास्थ्य-मतीवाप निर्मलं चाभवन्नभः(**स्_ स्वा॒हा॑**)॥२८

(**क्लीं**) उत्पात-मेघास् सोल्का ये प्रागा-संस्ते शमं ययुः।
सरितो मार्ग-वाहिन्यस्-तथा-संस्तत्र पातिते(**स्_ स्वा॒हा॑**)॥२९

(**क्लीं**) ततो देवगणास् सर्वे हर्ष-निर्भर-मानसाः।
बभूवुर्-निहते तस्मिन् गन्धर्वा ललितं जगुः(**स्_ स्वा॒हा॑**)॥३०

(**क्लीं**) अवादयंस्-तथै-वान्ये ननृ-तुश्-चाप्सरोगणाः।
ववुफ् पुण्यास्-तथा वातास् सुप्रभो-ऽभूद्-दिवाकरः(**स्_ स्वा॒हा॑**)॥

(**क्लीं**) जज्-वलुश्-चाग्नयश् शान्ताश् शान्ता दिग्-जनितस्-वनाः(**स्_ स्वा॒हा॑**)॥ ॐ ॥३२

**Parayana Ghosham**

**स॒त्यास् सं॒न्तु॒ यज॑मानस्य॒ कामाः॑।**

नमो देव्यै महादेव्यै शिवायै सततं नमः।
नमफ् प्रकृत्यै भद्रायै नियताफ् प्रणतास् स्म ताम्॥
साङ्गायै सायुधायै सपरिवारायै सर्वात्मिकायै

सिम्ह-वाहिन्यै त्रिशूल-पाश-धारिण्यै नमः ॥

**Homa Ghosham**

**स॒त्यास् सं॑न्तु यजं॑मानस्य॒ कामाँः।**

नमो देव्यै महादेव्यै शिवायै सततं नमः।
नमफ् प्रकृत्यै भद्रायै नियताफ् प्रणतास् स्म ताम्॥
साङ्गायै सायुधायै सपरिवारायै सर्वात्मिकायै
सिम्ह-वाहिन्यै त्रिशूल-पाश-धारिण्यै
महाहुतिं समर्पयामि नमस् **स्वा॒हाँ** ॥ वौषट्॥

सिम्ह-वाहिन्यै त्रिशूल-पाश-धारिण्यायिदन्नमम॥

## एकादशोध्यायः

ॐ (**क्लीं**) ऋषिरुवाच(**स् स्वा॒हाँ** )॥१

(**क्लीं**) देव्या हते तत्र महा-सुरेन्द्रे
सेन्द्रास् सुरा वह्नि-पुरोग-मास्ताम्।
कात्यायनीं तुष्टु-वुरिष्ट-लाभाद्
विकाशि-वक्त्राब्ज-विकाशि-ताशाः(**स् स्वा॒हाँ** )॥२

(**क्लीं**) देवि प्रपन्नार्तिहरे प्रसीद
प्रसीद मातर्-जगतो-ऽखिलस्य।
प्रसीद विश्वेश्वरि पाहि विश्वं
त्वमीश्वरी देवि चराचरस्य(**स् स्वा॒हाँ** )॥३

(**क्लीं**) आधार-भूता जग-तस्त्व-मेका
मही-स्वरूपेण यतस् स्थितासि।
अपां स्वरूपस्-स्थितया त्वयै-तद्
दाप्या-यते कृत्स्न-मलङ्घ्य-वीर्ये(**स् स्वा॒हाँ** )॥४

(**क्लीं**) त्वं वैष्णवी-शक्ति-रनन्त-वीर्या
विश्वस्य बीजं परमासि माया।
सम्मोहितं देवि समस्त-मेतत्
त्वं वै प्रसन्ना भुवि मुक्ति-हेतुः(**स् स्वा॒हाँ** )॥५

(**क्लीं**) विद्यास् समस्तास्-तव देवि भेदास्
स्त्रियस् समस्तास् सकला जगत्सु।
त्वयै-कया पूरित-मम्बयैतत्
का ते स्तुतिस् स्तव्य-परा-परोक्तिः(**स् स्वा॒हाँ** )॥६

(**क्लीं**) सर्वभूता यदा देवी स्वर्ग-मुक्ति-प्रदायिनी।
त्वं स्तुता स्तुतये का वा भवन्तु पर-मोक्तयः(**स्‌ स्वा॒हा॑**)॥७

(**क्लीं**) सर्वस्य बुद्धि-रूपेण जनस्य हृदि संस्थिते।
स्वर्गा-पवर्गदे देवि नारायणि नमोऽस्तु ते(**स्‌ स्वा॒हा॑**)॥८

(**क्लीं**) कला-काष्ठादि-रूपेण परिणाम-प्रदायिनि।
विश्वस्यो-परतौ शक्ते नारायणि नमोऽस्तु ते(**स्‌ स्वा॒हा॑**)॥९

(**क्लीं**) सर्वमङ्गलमाङ्गल्ये शिवे सर्वार्थसाधिके।
शरण्ये त्र्यम्बके गौरि नारायणि नमोऽस्तु ते(**स्‌ स्वा॒हा॑**)॥१०

(**क्लीं**) सृष्टि-स्थिति-विनाशानां शक्ति-भूते सनातनि।
गुणाश्रये गुणमये नारायणि नमोऽस्तु ते(**स्‌ स्वा॒हा॑**)॥११

(**क्लीं**) शरणागत-दीनार्त-परित्राण-परायणे।
सर्वस्यार्तिहरे देवि नारायणि नमोऽस्तु ते(**स्‌ स्वा॒हा॑**)॥१२

(**क्लीं**) हंस-युक्त-विमानस्थे ब्रह्माणी-रूप-धारिणि।

कौशाम्भः क्षरिके देवि नारायणि नमोऽस्तु ते(**स्‌ स्वा॒हाँ** )॥१३

(**क्लीं**) त्रिशूल-चन्द्राहि-धरे महा-वृषभ-वाहिनि।
माहेश्वरी-स्वरूपेण नारायणि नमोऽस्तुते(**स्‌ स्वा॒हाँ** )॥१४

(**क्लीं**) मयूर-कुक्कुट-वृते महाशक्ति-धरेऽनघे।
कौमारी-रूप-संस्थाने नारायणि नमोऽस्तु ते(**स्‌ स्वा॒हाँ** )॥१५

(**क्लीं**) शङ्ख-चक्र-गदा-शार्ङ्ग-गृहीत-परमायुधे।
प्रसीद वैष्णवीरूपे नारायणि नमोऽस्तु ते(**स्‌ स्वा॒हाँ** )॥१६

(**क्लीं**) गृहीतोग्र-महाचक्रे दंष्ट्रोद्-धृत-वसुन्धरे।
वराह-रूपिणि शिवे नारायणि नमोऽस्तु ते(**स्‌ स्वा॒हाँ** )॥१७

(**क्लीं**) नृसिंह-रूपेणो-ग्रेण हन्तुं दैत्यान् कृतोद्-द्यमे।
त्रैलोक्य-त्राण-सहिते नारायणि नमोऽस्तु ते(**स्‌ स्वा॒हाँ** )॥१८

(**क्लीं**) किरीटिनि महा-वज्रे सहस्र-नयनोज्-ज्वले।

वृत्र-प्राणहरे चैन्द्रि नारायणि नमोऽस्तु ते(**स् स्वाहा**)॥१९

(**क्लीं**) शिवदूती-स्वरूपेण हत-दैत्य-महाबले।
घोर-रूपे महारावे नारायणि नमोऽस्तु ते(**स् स्वाहा**)॥२०

(**क्लीं**) दंष्ट्रा-कराल-वदने शिरो-माला-विभूषणे।
चामुण्डे मुण्ड-मथने नारायणि नमोऽस्तु ते(**स् स्वाहा**)॥२१

(**क्लीं**) लक्ष्मि-लज्जे महा-विद्ये श्रद्धे पुष्टि स्वधे ध्रुवे।
महा-रात्रि महा-विध्ये नारायणि नमोऽस्तु ते(**स् स्वाहा**)॥२२

(**क्लीं**) मेधे सरस्वति वरे भूति बाभ्रवि-तामसि।
नियते त्वं प्रसीदेशे नारायणि नमोऽस्तुते(**स् स्वाहा**)॥२३

(**क्लीं**) सर्वस्वरूपे सर्वेशे सर्वशक्ति-समन्विते।
भयेभ्यस्त्राहि नो देवि दुर्गे देवि नमोऽस्तु ते(**स् स्वाहा**)॥२४

(**क्लीं**) एतत्ते वदनं सौम्यं लोचन-त्रय-भूषितम्।

पातु नस् सर्व-भीतिभ्यक् कात्यायनि नमोऽस्तु ते(**स् स्वाहा** )

(**क्लीं**) ज्वाला-कराल-मत्युग्र-मशेषासुर-सूदनम्।
त्रिशूलं पातु नो भीतेर्-भद्रकालि नमोऽस्तु ते(**स् स्वाहा** )॥२६

(**क्लीं**) हिनस्ति दैत्य-तेजांसि स्वनेना-पूर्य या जगत्।
सा घण्टा पातु नो देवि पापेभ्यो नस् सुतानिव(**स् स्वाहा** )॥२७

(**क्लीं**) असुरा-सृग्-वसा-पङ्क-चर्चि-तस्ते करोज्-ज्वलः।
शुभाय खड्गो भवतु चण्डिके त्वां नता वयम्(**स् स्वाहा** )॥२८

(**क्लीं**) रोगान-शेषा-नपहंसि तुष्टा
रुष्टा तु कामान् सकलान-भीष्टान्।
त्वामाश्रितानां न विपन्नराणां
त्वामाश्रिता ह्याश्रयतां प्रयान्ति(**स् स्वाहा** )॥२९

(**क्लीं**) एतत्-कृतं यत्-कदनं त्व-याद्य-
धर्मद्-द्विविषां देवि महासुराणाम्।
रूपै-रनेकैर्-बहु-धात्म-मूर्तिम्

कृत्वाम्बिके तत्-प्रकरोति कान्या(**स् स्वा̲हाँ** )॥३०

(**क्लीं**) विद्यासु शास्त्रेषु विवेक-दीपेष्-
वाद्येषु वाक्येषु च का त्व-दन्या।
ममत्व-गर्तेऽति-महान्धकारे
विभ्रा-मयत्ये-तदतीव विश्वम्(**स् स्वा̲हाँ** )॥३१

(**क्लीं**) रक्षांसि यत्रोग्र-विषाश्च नागा
यत्रा-रयो दस्यु-बलानि यत्र।
दावा-नलो यत्र तथाब्धि-मध्ये
तत्र स्थिता त्वं परिपासि विश्वम्(**स् स्वा̲हाँ** )॥३२

(**क्लीं**) विश्वेश्वरि त्वं परिपासि विश्वं
विश्वात्मिका धारयसीति विश्वम्।
विश्वेश-वन्द्या भवती भवन्ति
विश्वाश्रया ये त्वयि भक्ति-नम्राः(**स् स्वा̲हाँ** )॥३३

(**क्लीं**) देवि प्रसीद परिपालय नोऽरिभीतेर्
नित्यं यथा-सुर-वधा-दधु-नैव सद्यः।
पापानि सर्व-जगतां प्रशमं नयाशु

उत्पात-पाक-जनि-तांश्च महोप-सर्गान्(**स्‌ स्वा॒हा॑ **)॥३४

(**क्लीं**) प्रणतानां प्रसीद त्वं देवि विश्वार्ति-हारिणि।

त्रैलोक्य-वासिना-मीड्ये लोकानां वरदा भव(**स्‌ स्वा॒हा॑ **)॥३५

(**क्लीं**) देव्युवाच(**स्‌ स्वा॒हा॑ **)॥ ३६॥

(**क्लीं**) वरदाहं सुरगणा वरं यन्मन-सेच्छथ।

तं वृणुध्वं प्रयच्छामि जगतामुप-कारकम्(**स्‌ स्वा॒हा॑ **)॥३७

(**क्लीं**) देवा ऊचुः(**स्‌ स्वा॒हा॑ **)॥३८

(**क्लीं**) सर्वबाधा-प्रशमनं त्रैलोक्यस्याखिलेश्वरि।

एवमेव त्वया कार्य-मस्मद्-वैरि-विनाशनम्(**स्‌ स्वा॒हा॑ **)॥३९

(**क्लीं**) देव्युवाच(**स्‌ स्वा॒हा॑ **)॥४०

(**क्लीं**) वैवस्व-तेऽन्तरे प्राप्ते अष्टा-विंश-तिमे युगे।

शुम्भो निशुम्भश्-चैवान्या-वुत्-पत्-स्येते महासुरौ (**स् स्वा॒हा॑**)

(**क्लीं**) नन्द-गोप-गृहे जाता यशोदा-गर्भ-सम्भवा।
ततस्तौ नाश-यिष्यामि विन्ध्याचल-निवासिनी(**स् स्वा॒हा॑**)॥

(**क्लीं**) पुन-रप्यति-रौद्रेण रूपेण पृथिवी-तले।
अवतीर्य हनिष्यामि वैप्र-चित्तांस्तु दानवान्(**स् स्वा॒हा॑**)॥४३

(**क्लीं**) भक्ष-यन्त्-याश्च तानु-ग्रान् वैप्र-चित्तान् महासुरान्।
रक्ता दन्ता भविष्यन्ति दाडिमी-कुसुमोपमाः(**स् स्वा॒हा॑**)॥४४

(**क्लीं**) ततो मां देवतास् स्वर्गे मर्त्य-लोके च मानवाः।
स्तुवन्तो व्या-हरिष्यन्ति सततं रक्त-दन्तिकाम् ॥ (**स् स्वा॒हा॑**)

(**क्लीं**) भूयश्च शत-वार्षिक्या-मना-वृष्ट्या-मनम्भसि।
मुनिभिस् संस्मृता भूमौ सम्-भविष्याम्य-योनिजा ॥ (**स् स्वा॒हा॑**)

(**क्लीं**) ततश् शतेन नेत्राणां निरी-क्षिष्यामि-यन्मुनीन्।

कीर्त-यिष्यन्ति मनुजाश् शताक्षी-मिति मां ततः ॥ **(स् स्वा॒हाँ )**॥

(**क्लीं**) ततोऽह-मखिलं लोक-मात्म-देह-समुद्-भवैः।
भरिष्यामि सुरास् शाकै-रावृष्टेफ् प्राण-धारकैः ॥ **(स् स्वा॒हाँ )**॥

(**क्लीं**) शाकम्भरीति विख्यातिं तदा यास्-याम्यहं भुवि।
तत्रैव च वधिष्यामि दुर्ग-माख्यं महासुरम् ॥ **(स् स्वा॒हाँ )**॥४९

(**क्लीं**) दुर्गा-देवीति विख्यातं तन्मे नाम भविष्यति।
पुनश्चाहं यदा भीमं रूपं कृत्वा हिमाचले ॥ **(स् स्वा॒हाँ )**॥५०

(**क्लीं**) रक्षांसि भक्षयिष्यामि मुनीनां त्राण-कारणात्।
तदा मां मुनयस् सर्वे स्तोष्-यन्त्या-नम्र-मूर्तयः ॥ **(स् स्वा॒हाँ )**॥

(**क्लीं**) भीमा-देवीति विख्यातं तन्मे नाम भविष्यति।
यदा-रुणा-ख्यस्-त्रैलोक्ये महाबाधां करिष्यति ॥ **(स् स्वा॒हाँ )**

(**क्लीं**) तदाहं भ्रामरं रूपं कृत्वा-संख्येय-षट्-पदम्।

त्रैलोक्यस्य हितार्-थाय वधिष्यामि महासुरम् ॥ **(स् स्वा॒हाँ )**॥

(**क्लीं**) भ्राम-रीति च मां लोकास्-तदा स्तोष्यन्ति सर्वतः।
इत्थं यदा यदा बाधा दान-वोत्था भविष्यति ॥ **(स् स्वा॒हाँ )**॥

(**क्लीं**) तदा तदाव-तीर्याहं करिष्-याम्यरि-संक्षयम् ॥ **(स् स्वा॒हाँ )**॥
५५॥ ॐ

**Parayana Ghosham**

**स॒त्यास् सं॑न्तु यजं॑मानस्य॒ कामाँः।**

नमो देव्यै महादेव्यै शिवायै सततं नमः।
नमफ् प्रकृत्यै भद्रायै नियताफ् प्रणतास् स्म ताम्॥
साङ्गायै सायुधायै सपरिवारायै सर्वात्मिकायै
सर्व-नारायण्यै नमः ॥

**Homa Ghosham**

**स॒त्यास् सं॑न्तु यजं॑मानस्य॒ कामाँः।**

नमो देव्यै महादेव्यै शिवायै सततं नमः।
नमफ् प्रकृत्यै भद्रायै नियताफ् प्रणतास् स्म ताम्॥

साङ्गायै सायुधायै सपरिवारायै सर्वात्मिकायै
सर्व-नारायण्यै
महाहुतिं समर्पयामि नमस् **स्वा॒हाँ** ॥ वौषट्॥

सर्वनारायण्यायिदन्नमम॥

## द्वादशोध्यायः

ॐ (**क्लीं**) देव्युवाच ॥ (**स् स्वा॒हाँ** )॥१

(**क्लीं**) एभिस् स्तवैश्च मां नित्यं स्तोष्यते यस् समाहितः।
तस्याहं सकलां बाधां नाश-यिष्याम्य-संशयम् ॥ (**स् स्वा॒हाँ** )॥

(**क्लीं**) मधुकैटभ-नाशं च महिषासुर-घातनम्।
कीर्त-यिष्यन्ति ये तद्-वद्-वधं शुम्भ-निशुम्भयोः ॥ (**स् स्वा॒हाँ**)॥

(**क्लीं**) अष्टम्यां च चतुर्-दश्यां नवम्यां चैक-चेतसः।

श्रोष्यन्ति चैव ये भक्त्या मम माहात्म्य-मुत्तमम् ॥ (स् स्वा॒हाँ )

(क्लीं) न तेषां दुष्-कृतं किञ्चिद्-दुष्-कृतोत्था न चापदः।
भविष्यति न दारिद्र्यं न चैवेष्ट-वियोजनम् ॥ (स् स्वा॒हाँ )॥५

(क्लीं) शत्रुतो न भयं तस्य दस्युतो वा न राजतः।
न शस्त्रा-नल-तोयौ-घात् कदाचित् सम्-भविष्यति ॥ (स् स्वा॒हाँ )॥६

(क्लीं) तस्मान्-ममैतन्-माहात्म्यं पठि-तव्यं समाहितैः।
श्रोतव्यं च सदा भक्त्या परं स्वस्त्य-यनं हि तत् ॥ (स् स्वा॒हाँ )

(क्लीं) उप-सर्गान-शेषांस्तु महामारी-समुद्-भवान्।
तथा त्रिविध-मुत्पातं माहात्म्यं शम-येन्मम ॥ (स् स्वा॒हाँ )॥८

(क्लीं) यत्रै-तत्-पठ्यते सम्यङ्-नित्य-मायतने मम।
सदा न तद्-विमोक्ष्यामि सां-निध्यं तत्र मे स्थितम् ॥ (स् स्वा॒हाँ

(क्लीं) बलि-प्रदाने पूजाया-मग्नि-कार्ये महोत्सवे।

सर्वं ममैतच्-चरित-मुच्चार्यं श्राव्य-मेव च ॥ **(स् स्वाहा )**॥१०

(**क्लीं**) जानता-जानता वापि बलि-पूजां तथा कृताम्।
प्रतीक्-क्षिष्याम्यहं प्रीत्या वह्नि-होमं तथा-कृतम् ॥ **(स् स्वाहा)**॥११

(**क्लीं**) शरत्काले महापूजा क्रियते या च वार्षिकी।
तस्यां ममैतन्-माहात्म्यं श्रुत्वा भक्ति-समन्वितः ॥ **(स् स्वाहा )**॥१२

(**क्लीं**) सर्वाबाधा-विनिर्-मुक्तो धन-धान्य-सुतान्वितः।
मनुष्यो मत्-प्रसादेन भविष्यति न संशयः ॥ **(स् स्वाहा )**॥१३

(**क्लीं**) श्रुत्वा ममैतन्-माहात्म्यं तथा चोत्-पत्-तयश् शुभाः ।
पराक्रमं च युद्धेषु जायते निर्भयफ् पुमान् ॥ **(स् स्वाहा )**॥१४

(**क्लीं**) रिपवस् संक्षयं यान्ति कल्याणं चोप-पद्यते।
नन्दते च कुलं पुंसां माहात्म्यं मम श्रृण्वताम् ॥ **(स् स्वाहा )**॥

(**क्लीं**) शान्ति-कर्मणि सर्वत्र तथा दुस्-स्वप्न-दर्शने।

ग्रह-पीडासु चोग्रासु माहात्म्यं शृणुयान्-मम ॥ **(स्̱ स्वा̱हा॑ )**॥

(**क्लीं**) उप-सर्गाश् शमं यान्ति ग्रह-पीडाश्च दारुणाः।
दुस्-स्वप्नं च नृभिर्-दृष्टं सुस्-स्वप्न-मुप-जायते ॥ **(स्̱ स्वा̱हा॑)**॥

(**क्लीं**) बाल-ग्रहाभि-भूतानां बालानां शान्ति-कारकम्।
संघात-भेदे च नृणां मैत्री-करण-मुत्तमम् ॥ **(स्̱ स्वा̱हा॑ )**॥१८

(**क्लीं**) दुर्वृत्ता-नाम-शेषाणां बल-हानिकरं परम्।
रक्षो-भूत-पिशाचानां पठना-देव नाशनम् ॥ **(स्̱ स्वा̱हा॑ )**॥१९

(**क्लीं**) सर्वं ममैतन्-माहात्म्यं मम सन्निधि-कारकम्।
पशु-पुष्पार्घ्य-धूपैश्च गन्ध-दीपैस्-तथोत्-तमैः ॥ **(स्̱ स्वा̱हा॑ )**॥

(**क्लीं**) विप्राणां भोजनैर्-होमैफ् प्रोक्षणीयै-रहर्-निशम्।
अन्यैश्च विविधैर्-भोगैफ् प्रदानैर्-वत्सरेण या ॥ **(स्̱ स्वा̱हा॑ )**॥

(**क्लीं**) प्रीतिर्-मे क्रियते सास्मिन् सकृत्-सुचरिते श्रुते।

श्रृतं हरति पापानि तथा-रोग्यं प्रयच्छति ॥ (**स् स्वा॒हा॑**)॥२२

(**क्लीं**) रक्षां करोति भूतेभ्यो जन्मनां कीर्तनं मम।
युद्धेषु चरितं यन्मे दुष्ट-दैत्य-निबर्-हणम् ॥ (**स् स्वा॒हा॑**)॥२३

(**क्लीं**) तस्मिञ्-छ्रुते वैरि-कृतं भयं पुंसां न जायते।
युष्माभिस् स्तुतयो याश्च याश्च ब्रह्मर्षिभिक् कृताः ॥ (**स् स्वा॒हा॑**)

(**क्लीं**) ब्रह्मणा च कृतास्-तास्तु प्रयच्छन्ति शुभां मतिम्।
अरण्ये प्रान्तरे वापि दावाग्नि-परि-वारितः ॥ (**स् स्वा॒हा॑**)॥२५

(**क्लीं**) दस्यु-भिर्वा वृतश् शून्ये गृहीतो वापि शत्रुभिः।
सिंह-व्याघ्रानु-यातो वा वने वा वन-हस्तिभिः ॥ (**स् स्वा॒हा॑**)॥

(**क्लीं**) राज्ञा क्रुद्धेन चाज्ञप्तो वध्यो बन्ध-गतोऽपि वा।
आघूर्णितो वा वातेन स्थितफ् पोते महार्णवे ॥ (**स् स्वा॒हा॑**)॥२७

(**क्लीं**) पतत्सु चापि शस्त्रेषु सङ्ग्रामे भृश-दारुणे।

सर्वा-बाधासु घोरासु वेद-नाभ्यर्-दितोऽपि वा ॥ **(स् स्वा॒हाँ )**॥

**(क्लीं)** स्मरन् ममैतच्-चरितं नरो मुच्येत सङ्कटात्।

मम प्रभावात्-सिंहाद्या दस्यवो वैरिण-स्तथा ॥ **(स् स्वा॒हाँ )**॥

दूरादेव पलायन्ते स्मरतश्-चरितं मम ॥ **(स् स्वा॒हाँ )**॥३०

**(क्लीं)** ऋषिरुवाच ॥ **(स् स्वा॒हाँ )**॥३१

**(क्लीं)** इत्युक्त्वा सा भगवती चण्डिका चण्ड-विक्रमा ॥ **(स् स्वा॒हाँ )**

**(क्लीं)** पश्यता-मेव देवानां तत्रै-वान्तर-धीयत।

तेऽपि देवा निरा-तङ्कास् स्वाधिकारान्-यथा पुरा ॥ **(स् स्वा॒हाँ )**॥३३

**(क्लीं)** यज्ञ-भाग-भुजस् सर्वे चक्रुर्-विनि-हतारयः।

दैत्याश्च देव्या निहते शुम्भे देव-रिपौ युधि ॥ **(स् स्वा॒हाँ )**॥३४

**(क्लीं)** जगद्-विध्वंसिनि तस्मिन् महोग्रे-ऽतुल-विक्रमे।

निशुम्भे च महावीर्ये शेषाफ् पाताल-माययुः ॥ **(स् स्वा॒हाँ )**॥३५

(क्लीं) एवं भगवती देवी सा नित्यापि पुनफ् पुनः।

सम्भूय कुरुते भूप जगतफ् परि-पालनम् ॥ **(स्‌ स्वाहा )**॥३६

(क्लीं) तयै-तन्-मोह्यते विश्वं सैव विश्वं प्रसूयते।

सा याचिता च विज्ञानं तुष्टा ऋद्धिं प्रयच्छति ॥ **(स्‌ स्वाहा )**॥३७

(क्लीं) व्याप्तं तयै-तत्-सकलं ब्रह्माण्डं मनु-जेश्वर।

महा-काल्या महाकाले महामारी-स्वरूपया ॥ **(स्‌ स्वाहा )**॥३८

(क्लीं) सैव काले महामारी सैव सृष्टिर्-भवत्-यजा।

स्थितिं करोति भूतानां सैव काले सनातनी ॥ **(स्‌ स्वाहा )**॥३९

(क्लीं) भवकाले नृणां सैव लक्ष्मीर्-वृद्धि-प्रदा गृहे।

सैवाभावे तथा-लक्ष्मीर्-विनाशा-योप-जायते ॥ **(स्‌ स्वाहा )**॥ ४०

(क्लीं) स्तुता सम्पूजिता पुष्पैर्-धूप-गन्धादि-भिस्-तथा।

ददाति वित्तं पुत्रांश्च मतिं धर्मे गतिं शुभाम्॥ **(स्‌ स्वाहा )** (क्लीं) ॐ॥ ४१

**Parayana Ghosham**

**स॒त्यास्॒ सं॑न्तु॒ यजं॑मानस्य॒ कामाः॑।**

नमो देव्यै महादेव्यै शिवायै सततं नमः।

नमफ् प्रकृत्यै भद्रायै नियताफ् प्रणतास् स्म ताम्॥

साङ्गायै सायुधायै सपरिवारायै सर्वात्मिकायै

बाला-त्रिपुर-सुन्दर्यै नमः ॥

**Homa Ghosham**

**स॒त्यास्॒ सं॑न्तु॒ यजं॑मानस्य॒ कामाः॑।**

नमो देव्यै महादेव्यै शिवायै सततं नमः।

नमफ् प्रकृत्यै भद्रायै नियताफ् प्रणतास् स्म ताम्॥

साङ्गायै सायुधायै सपरिवारायै सर्वात्मिकायै

बाला-त्रिपुर-सुन्दर्यै

महाहुतिं समर्पयामि नमस् **स्वा॒हा॑** ॥ वौषट्॥

बाला-त्रिपुर-सुन्दर्यायिदन्नमम॥

# त्रयोदशोध्यायः

ॐ (क्लीं) ऋषिरुवाच ॥ (स्  स्वा॒हा॑ )॥१

(क्लीं) एतत्ते कथितं भूप देवीमाहात्म्य-मुत्तमम्।
एवं-प्रभावा सा देवी ययेदं धार्यते जगत् ॥ (स्  स्वा॒हा॑ )॥२

(क्लीं) विद्या तथैव क्रियते भगवद्-विष्णु-मायया।
तया त्वमेष वैश्यश्च तथै-वान्ये विवेकिनः ॥ (स्  स्वा॒हा॑ )॥३

(क्लीं) मोह्यन्ते मोहिताश्-चैव मोह-मेष्यन्ति चापरे।
तामु-पैहि महाराज शरणं परमेश्वरीम् ॥ (स्  स्वा॒हा॑ )॥४

(क्लीं) आराधिता सैव नृणां भोगस्-स्वर्गाप-वर्गदा ॥ (स्  स्वा॒हा॑ )॥

(क्लीं) मार्कण्डेय उवाच ॥ (स्  स्वा॒हा॑ )॥६

इति तस्य वचश् श्रुत्वा सुरथस् स नराधिपः ॥ (स्  स्वा॒हा॑ )॥७

(**क्लीं**) प्रणि-पत्य महाभागं तमृषिं संशित-व्रतम्।

निर्विण्णो-ऽतिम-मत्वेन राज्या-पहरणेन च ॥ (**स् स्वा॒हा॑** )॥८

(**क्लीं**) जगाम सद्यस्-तपसे स च वैश्यो महामुने।

संदर्श-नार्थ-मम्बाया नदी-पुलिन-संस्थितः ॥ (**स् स्वा॒हा॑** )॥९

(**क्लीं**) स च वैश्यस्-तपस्-तेपे देवी-सूक्तं परं जपन्।

तौ तस्मिन् पुलिने देव्याक् कृत्वा मूर्तिं मही-मयीम् ॥ (**स् स्वा॒हा॑** )॥१०

(**क्लीं**) अर्हणां चक्र-तुस्-तस्याफ् पुष्प-धूपाग्नि-तर्पणैः।

निरा-हारौ यता-हारौ तन्मनस्कौ समा-हितौ ॥ (**स् स्वा॒हा॑** ) ॥११

(**क्लीं**) दद-तुस्तौ बलिं चैव निज-गात्रासृ-गुक्षितम्।

एवं समा-राधयतो-स्त्रिभिर्-वर्षैर्-यतात्-मनोः ॥ (**स् स्वा॒हा॑** )॥१२

(**क्लीं**) परितुष्टा जगद्धात्री प्रत्यक्षं प्राह चण्डिका ॥ (**स् स्वा॒हा॑** )॥१३

(**क्लीं**) देव्युवाच ॥ (**स् स्वा॒हा॑** )॥१४

(क्लीं) यत्-प्रार्थ्यते त्वया भूप त्वया च कुलनन्दन।

मत्-तस्-तत्-प्राप्यतां सर्वं परितुष्टा ददामि-तत् ॥ **(स् स्वाहा )**॥१५

(क्लीं) मार्कण्डेय उवाच ॥ **(स् स्वाहा )**॥१६

(क्लीं) ततो वव्रे नृपो राज्य-मविभ्-भ्रं-श्यन्य-जन्मनि।

अत्रैव च निजं राज्यं हत-शत्रु-बलं बलात् ॥ **(स् स्वाहा )**॥१७

(क्लीं) सोऽपि वैश्यत्-ततो ज्ञानं वव्रे निर्-विण्ण-मानसः।

ममेत्-त्यह-मिति प्राज्ञस् सङ्ग-विच्युति-कारकम् ॥ **(स् स्वाहा )**॥१८

(क्लीं) देव्युवाच ॥ **(स् स्वाहा )**॥१९

(क्लीं)स्वल्पै-रहोभिर्-नृपते स्वं राज्यं प्राप्स्यते भवान् ॥ **(स् स्वाहा )**॥

(क्लीं) हत्वा रिपूनस्-खलितं तव तत्र भविष्यति ॥ **(स् स्वाहा )**॥२१

(क्लीं) मृतश्च भूयस् सम्प्राप्य जन्म देवाद्-विवस्वतः ॥ **(स् स्वाहा )**॥२२

(क्लीं) सावर्णिको नाम-मनुर् भवान्-भुवि भविष्यति ॥ **(स् स्वाहा )**॥२३

(क्लीं) वैश्य-वर्य त्वया यश्च वरोऽस्-मत्तोऽभि-वाञ्छितः
तं प्रयच्छामि संसिद्ध्यै तव ज्ञानं भविष्यति ॥ **(स् स्वा॒हाँ )**॥२४

(क्लीं) मार्कण्डेय उवाच ॥ **(स् स्वा॒हाँ )**॥२५

(क्लीं) इति दत्वा तयोर्-देवी यथा-भिलषितं वरम्।
बभूवान्तर्-हिता सद्यो भक्त्या ताभ्याम-भिष्टुता ॥ **(स् स्वा॒हाँ )**॥२६

(क्लीं) एवं देव्या वरं लब्ध्वा सुरथः क्षत्रियर्षभः।
सूर्याज्-जन्म समा-साद्य सावर्णिर्-भविता मनुः ॥**(स् स्वा॒हाँ)**॥२७

सावर्णिर्-भविता मनुः ॥ **(स् स्वा॒हाँ )**॥२८ ॥ क्लींॐ ॥

**Parayana Ghosham**

**स॒त्यास् सं॑न्तु॒ यजं॑मानस्य॒ कामाः॑।**

नमो देव्यै महादेव्यै शिवायै सततं नमः।
नमफ् प्रकृत्यै भद्रायै नियताफ् प्रणतास् स्म ताम्॥
साङ्गायै सायुधायै सपरिवारायै सर्वात्मिकायै
श्रीमहा-त्रिपुर-सुन्दर्यै श्रीविध्यायै नमः ॥

सत्यास् संन्तु यजंमानस्य कामाँः।

नमो देव्यै महादेव्यै शिवायै सततं नमः।
नमफ् प्रकृत्यै भद्रायै नियताफ् प्रणतास् स्म ताम्॥
साङ्गायै सायुधायै सपरिवारायै सर्वात्मिकायै
श्रीमहा-त्रिपुर-सुन्दर्यै श्रीविध्यायै
महाहुतिं समर्पयामि नमस् स्वाहाँ ॥ वौषट्॥

श्रीमहा-त्रिपुर-सुन्दर्यै श्रीविध्यायिदन्नमम॥

# सप्तशती न्यासम्

ॐ खड्गिनी शूलिनी घोरा गदिनी चक्रिणी तथा।
शङ्खिनी चापिनी बाण-भुशुण्डी परिघायुधा॥ हृदयाय नमः। Touch your heart with right hand

शूलेन पाहि नो देवि पाहि खड्गेन चाम्बिके
घण्टास्वनेन नफ् पाहि चापज्या-निस्-स्वनेन च॥ शिरसे स्वाहा।।Touch top of head with right hand

प्राच्यां रक्ष प्रतीच्यां च चण्डिके रक्ष दक्षिणे।

भ्रामणेनात्म-शूलस्य उत्तरस्यां तथेश्वरि। शिखायै वषट्।।Touch behind the head with right hand

सौम्यानि यानि रूपाणि त्रैलोक्ये विचरन्ति ते।
यानि चात्यर्थ-घोराणि तैरक्षास्-मांस्-तथा भुवम्॥ कवचाय हुम्।।Cross your hands across the chest।

खड्ग-शूल-गदादीनि यानि चास्त्राणि तेऽम्बिके।
करपल्लव-सङ्गीनि तैरस्मान्-रक्ष सर्वतः॥ नेत्र-त्रयाय-वौषट्। With Index, middle and ring fingers touch right eye, middle of the eye brows, and left eye respectively at the same time

सर्वस्वरूपे सर्वेशे सर्व-शक्ति-समन्विते।
भयेभ्यस्-त्राहि नो देवि दुर्गे देवि नमोऽस्तु ते॥ अस्त्राय फट्। Slap index finger and middle finger of the right hand on the left palm

भूर्भुवस्सुवरों इति दिग्विमोकः॥ - Click index finger and the thumb in 8 directions around the head anti clockwise

ध्यानम्

विद्युद्दाम-समप्रभां मृगपतिस्-स्कन्धस्थिताम् भीषणां।
कन्याभिः करवाल-खेट-विलसद्-धस्ताभिरा-सेविताम्।
हस्तैश्चक्र-गदासि-खेट-विशिखांश्-चापं गुणं तर्जनीं ।
बिभ्राणा-मनलात्मिकां शशिधरां दुर्गां त्रिणेत्रां भजे॥

लं पृथिव्यात्मने गन्धं कल्पयामि।।Roll thumb on little finger from bottom to top।

हं आकाशात्मने पुष्पं कल्पयामि। Roll the index finger on thumb from bottom to top
यं वाय्वात्मने धूपं कल्पयामि। Roll the thumb on index finger from bottom to top
रं अग्न्यात्मने दीपं कल्पयामि। Roll thumb on middle finger from bottom to top
वं अमृतात्मने अमृतं कल्पयामि । Roll thumb on the ring finger from bottom to top
सं सर्वात्मने समस्तोपचारान् समर्पयामि ॥ Perform namaskar mudra

**नवाक्षरी जपः॥ (अपरार्धः)**

ॐ ऐं ह्रीं क्लीं चामुण्डायै विच्चे ॥

**नवाक्षरी जपहोमः॥ (अपरार्धः)**

ॐ ऐं ह्रीं क्लीं चामुण्डायै विच्चे **स् स्वाहा**॥

ऐं हृदयाय नमः। Touch your heart with right hand
ह्रीं शिरसे स्वाहा। Touch top of head with right hand
क्लीं शिखायै वषट्। Touch behind the head with right hand
चामुण्डायै कवचाय हुम्। Cross your hands across the chest
विच्चे नेत्रत्रयाय वौषट्। With Index, middle and ring fingers touch right eye, middle of the eye brows, and left eye respectively at the same time
ऐं ह्रीं क्लीं चामुण्डायै विच्चे अस्त्राय फट्। Slap index finger and middle finger of the right hand on the left palm
भूर्भुवस्सुवरोम् इति दिग्विमोकः॥ Click index finger and the thumb in 8 directions around the head anti clockwise

ध्यानम्

खड्गं चक्र-गदेषु-चाप-परिघां शूलं भुशुण्डीं शिरः।
शङ्खं सन्दधतीं करैस्-त्रिणयनां सर्वाङ्ग-भूषावृताम्।
नीलाश्म-ध्युति-मास्य-पाद-दशकां सेवे महा-कालिकाम् ।
यामस्तौत्-स्वपिते हरौ कमलजो हन्तुं मधुं कैटभम्॥

अक्षस्त्रक्-परशुं गदेषु कुलिशं पद्मं धनुष् कुण्डिकां
दण्डं शक्तिमसिं च चर्मजलजं घण्टां सुराभाजनम्।
शूलं पाश-सुदर्शने च दधतीं हस्तैफ् प्रसन्नाननां
सेवे सैरिभ-मर्दिनीमिह महा लक्ष्मीं सरोज-स्थिताम्॥

घण्टा-शूल-हलानि शङ्ख-मुसले चक्रं धनुस् सायकं
हस्ताब्जैर्-दधतीं घनान्त-विलसच्-छीताम्शु-तुल्य-प्रभाम् ।
गौरीदेह-समुद्भवां त्रिजगता-माधारभूतां महा-
पूर्वामत्र सरस्वती-मनुभजे शुम्भादि-दैत्यार्दिनीम्॥!

लं पृथिव्यात्मने गन्धं कल्पयामि। Roll the thumb on little finger from bottom to top
हं आकाशात्मने पुष्पं कल्पयामि। Roll the index finger on thumb from bottom to top
यं वाय्वात्मने धूपं कल्पयामि। Roll the thumb on index finger from bottom to top
रं अग्र्यात्मने दीपं कल्पयामि। thumb - Touch below chest with right hand
वं अमृतात्मने अमृतं निवेदयामि। thumb - ring
सं सर्वात्मने समस्तोपचारान् समर्पयामि॥ Namaste

# तन्त्रोक्त देवी सूक्तम्

नमो देव्यै महादेव्यै शिवायै सततं नमः।
नमफ् प्रकृत्यै भद्रायै नियताफ् प्रणतास् स्म ताम्॥ १॥

रौद्रायै नमो नित्यायै गौर्यै धात्र्यै नमो नमः।
ज्योत्स्नायै चेन्दु-रूपिण्यै सुखायै सततं नमः॥ २॥

कल्याण्यै प्रणतां वृद्ध्यै सिद्ध्यै कुर्मो नमो नमः।
नैर्-ऋत्यै भूभृतां लक्ष्म्यै शर्वाण्यै ते नमो नमः॥ ३॥

दुर्गायै दुर्गपारायै सारायै सर्वकारिण्यै।
ख्यात्यै तथैव कृष्णायै धूम्रायै सततं नमः॥ ४॥

अति-सौम्याति-रौद्रायै नतास्तस्यै नमो नमः।
नमो जगत्-प्रतिष्ठायै देव्यै कृत्यै नमो नमः॥ ५॥

या देवी सर्वभूतेषु विष्णुमायेति शब्दिता।
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः॥ ६॥

या देवी सर्वभूतेषु चेतनेत्यभि-धीयते।

नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः॥ ७॥
या देवी सर्वभूतेषु बुद्धिरूपेण संस्थिता।
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः॥ ८॥

या देवी सर्वभूतेषु निद्रारूपेण संस्थिता।
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः॥ ९॥

या देवी सर्वभूतेषु क्षुधारूपेण संस्थिता।
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः॥ १०॥

या देवी सर्वभूतेषुछ् छायारूपेण संस्थिता।
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः॥ ११॥

या देवी सर्वभूतेषु शक्तिरूपेण संस्थिता।
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः॥ १२॥

या देवी सर्वभूतेषु तृष्णारूपेण संस्थिता।
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः॥ १३॥

या देवी सर्वभूतेषु क्षान्तिरूपेण संस्थिता।
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः॥ १४॥

या देवी सर्वभूतेषु जातिरूपेण संस्थिता।
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः॥ १५॥
या देवी सर्वभूतेषु लज्जारूपेण संस्थिता।
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः॥ १६॥

या देवी सर्वभूतेषु शान्तिरूपेण संस्थिता।
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः॥ १७॥

या देवी सर्वभूतेषु श्रद्धारूपेण संस्थिता।
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः॥ १८॥

या देवी सर्वभूतेषु कान्तिरूपेण संस्थिता।
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः॥ १९॥

या देवी सर्वभूतेषु लक्ष्मीरूपेण संस्थिता।
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः॥ २०॥

या देवी सर्वभूतेषु वृत्तिरूपेण संस्थिता।
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः॥ २१॥

या देवी सर्वभूतेषु स्मृतिरूपेण संस्थिता।
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः॥ २२॥

या देवी सर्वभूतेषु दयारूपेण संस्थिता।
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः॥ २३॥

या देवी सर्वभूतेषु तुष्टिरूपेण संस्थिता।
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः॥ २४॥

या देवी सर्वभूतेषु मातृरूपेण संस्थिता।
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः॥ २५॥

या देवी सर्वभूतेषु भ्रान्तिरूपेण संस्थिता।
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः॥ २६॥

इन्द्रियाणा-मधिष्ठात्री भूतानां चाखिलेषु या।
भूतेषु सततं तस्यै व्याप्ति-देव्यै नमो नमः॥ २७॥

चितिरूपेण या कृत्स्नमेतद् व्याप्य स्थिता जगत्।
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः॥ २८॥

स्तुता सुरैफ् पूर्व-मभीष्ट-संश्रयात्-
तथा सुरेन्द्रेण दिनेषु सेविता।
करोतु सा नश्-शुभहेतु-रीश्वरी
शुभानि भद्राण्यभि-हन्तु चापदः॥ २९॥

या साम्प्रतं चोद्धत-दैत्य-तापितै-
रस्माभि-रीशा च सुरैर्-नमस्यते।
या च स्मृता तत्क्षणमेव हन्ति नस्
सर्वापदो भक्ति-विनम्र-मूर्तिभिः॥ ३०॥

## प्राधानिकं रहस्यम्

ॐ अस्य श्रीसप्तशती-रहस्य-त्रय-मन्त्रस्य
नारायण ऋषिः।!Touch back of head!
अनुष्टुप् छन्दः। Touch the mouth with Touch the right side below chest with right hand
hand
महाकाली महालक्ष्मी महासरस्वत्यो देवताः। Touch the heart
यथोक्त-फला-वाप्त्यर्थे जपे विनियोगः॥ Perform Namaskar Mudra

राजोवाच॥१॥

भगवन्-नवतारा मे चण्डिकायास्-त्वयो-दिताः।
एतेषां प्रकृतिं ब्रह्मन् प्रधानं वक्तु-मर्-हसि॥ २॥

आराध्यं यन्मया देव्यास् स्वरूपं येन च द्विज।
विधिना ब्रूहि सकलं यथा-वत्-प्रण-तस्य मे॥ ३॥

ऋषिरुवाच॥४॥

इदं रहस्यम् परम-मनाख्-ख्येयं प्रचक्षते।
भक्तोऽसीति न मे किञ्चित्-तवा-वाच्यं नराधिप॥ ५॥

सर्वास्-याध्या महालक्ष्मीस्- त्रिगुणा परमेश्वरी।
लक्ष्या-लक्ष्य-स्वरूपा सा व्याप्य कृत्स्नम् व्यवस्थिता॥ ६॥

मातु-लुङ्गं गदां खेटं पान-पात्रं च बिभ्रती।
नागं लिङ्गं च योनिं च बिभ्रती नृप मूर्-धनि॥ ७॥

तप्त-काञ्चन-वर्णाभा तप्त-काञ्चन-भूषणा।
शून्यं तदखिलं स्वेन पूरया-मास तेजसा॥ ८॥

शून्यं तदखिलं लोकं विलोक्य परमेश्वरी।
बभार परमं रूपं तमसा केवलेन हि॥ ९॥

सा भिन्-नाञ्-जन-सङ्काशा दंष्ट्राङ्-कित-वरानना।
विशाल-लोचना नारी बभूव तनु-मध्यमा॥ १०॥

खड्ग-पात्र-शिरख् खेटै-रलङ्कृत-चतुर्-भुजा।
कबन्ध-हारं शिरसा बिभ्राणा हि शिरस् स्रजम्॥ ११॥

सा प्रोवाच महालक्ष्मीं तामसी प्रमदोत्-तमा।
नाम कर्म च मे मातर्-देहि तुभ्यं नमो नमः॥ १२

तां प्रोवाच महालक्ष्मीस्-तामसीं प्रमदोत्-तमाम्।
ददामि तव नामानि यानि कर्माणि तानि ते॥ १३॥

महा-माया महा-कालि महा-मारी क्षुधा तृषा।
निद्रा तृष्णा चैक-वीरा काल-रात्रिर्-दुरत्-यया॥ १४ ॥

इमानि तव नामानि प्रति-पाध्-यानि कर्मभिः।
एभिक् कर्माणि ते ज्ञात्वा योऽधीते सोऽश्-नुते सुखम्॥ १५॥

तामित्-युक्त्वा महालक्ष्मीस् स्वरूप-मपरं नृप।
सत्-वाख्ये-नाति-शुद्धेन गुणे-नेन्दु-प्रभं दधौ॥ १६॥

अक्ष-मालाङ्-कुशधरा वीणा-पुस्तक-धारिणी ।
सा बभूव वरा नारी नामान्-यस्यै च सा ददौ॥ १७॥

महा-विध्या महावाणी भारती वाक् सरस्वती।
आर्या ब्राह्मी काम-धेनुर्-वेद-गर्भा च धीश्वरी॥१८॥

अथोवाच महालक्ष्मीर्-महाकालीं  सरस्वतीम्।

युवां जनयतां देव्यौ मिथुने स्वानु-रूपतः॥१९

इत्-युक्त्वा ते महालक्ष्मीस् ससर्ज मिथुनं स्वयम्।
हिरण्य-गर्भौ रुचिरौ स्त्री-पुम्सौ कमलासनौ॥२०॥

ब्रह्मन् विधे विरिञ्-चेति धात-रित्याह तं नरम्।
श्रीफ् पद्मे कमले लक्ष्मीत्-त्याह माता च तां स्त्रियम्॥२१॥

महाकालि भारती च मिथुने सृजतस् सह।
एत-योरपि रूपाणि नामानि च वदामि ते॥२२

नील-खण्ठं रक्त-बाहुं श्वेताङ्गं चन्द्र-शेखरम्।
जनया-मास पुरुषं महाकाली सिताम् स्त्रियम्॥ २३॥

स रुद्रश् शङ्करस् स्थाणुक् कपर्दि च त्रिलोचनः।
त्रयी विद्या काम-धेनुस् सा स्त्री भाषा-क्षरा स्वरा॥ २४॥

सरस्वती स्त्रियं गौरीं कृष्णं च पुरुषं नृप।
जनया-मास नामानि तयोरपि वदामि ते ॥२५

विष्णुक् कृष्णो हृषी-केशो वासुदेवो जनार्दनः।
उमा गौरी सती चण्डी सुन्दरी सुभगा शिवा॥२६॥

एवं युव-तयस् सध्यफ् पुरुष-त्वं प्रपे-दिरे।
चक्षुष्-मन्तो नु पश्यन्ति नेतरे-ऽतद्-विदो जनाः ॥ २७ ॥

ब्रह्मणे प्रददौ पत्नीं महालक्ष्मीर्-नृप त्रयीम्।
रुद्राय-गौरीं वरदां वासुदेवाय व श्रियम्॥ २८॥

स्वरया सह सम्भूय विरिञ्-चोऽण्डम-जीजनत्।
बिभेद भगवन् रुद्रस्-तद् गौर्या सह वीर्यवान्॥ २९॥

अण्ड-मध्ये प्रधा-नादि कार्य-जातम-भून्-नृप।
महा-भूतात्मकं सर्वं जगत्-स्थावर-जङ्गमम्॥ ३०॥

पुपोष पालया-मास तल्-लक्ष्म्या सह केशवः।
सञ्ज-हार जगत्-सर्वं सह गौर्या महेश्वरः॥ ३१॥

महा-लक्ष्मीर्-महा-राज सर्व-सत्व-मयीश्वरी।
निराकारा च साकारा सैव नाना-भिधान-भृत्॥ ३२॥

नामान्-तरैर्-निरूप्-यैषा नाम्ना नान्येन केनचित्॥ ३३॥ ॐ

# वैकृतिकं रहस्यम्

ऋषिरुवाच॥१॥

ॐ त्रिगुणा तामसी देवी सात्-विकी या त्रिधो-दिता।
सा शर्वा चण्डिका दुर्गा भद्रा भगवतीर्-यते॥ २॥

योग-निद्रा हरे-रुक्ता महाकाली तमो-गुणा।
मधुकैटभ-नाशार्थं यां तुष्टावाम्-बुजासनः॥ ३॥

दश-वक्त्रा दश-भुजा दश-पादाञ्-जन-प्रभा।
विशालया राजमाना त्रिंशल्-लोचन-मालया ॥ ४॥

स्फुरद्-दशन-दंष्ट्रा सा भीम-रूपापि भूमिप।
रूप-सौभाग्य-कान्तीनां सा प्रतिष्ठा महाश्रियः॥५॥

खड्ग-बाण-गदा-शूल-चक्र-शङ्ख-भु-शुण्डि-भृत्।
परिघं कार्-मुकं शीर्षं निश्च्य-योत-द्रुधिरं दधौ॥

एषा सा वैष्णवी माया महाकाली दुरत्-यया।
आराधिता वशी-कुर्यात् पूजा-कर्-तुश्-चरा-चरम्॥७॥

सर्वदेव-शरीरेभ्यो याऽऽविर्-भूता-मित-प्रभा।
त्रिगुणा सा महलक्ष्मीस् साक्षान्-महिष-मर्दिनी॥ ८॥

श्वेतानना नीलभुजा सुश्-वेतस्-तन-मण्डला।
रक्त-मध्या रक्त-पादा नील-जङ्घोरु-रुन्मदा॥ ९॥

सुचित्र-जघना चित्र-माल्याम्बर-विभूषणा।
चित्रानु-लेपना कान्ति-रूप-सौभाग्य-शालिनी॥१०॥

अष्ट-दश-भुजा पूज्या सा सहस्र-भुजा सती।
आयु-धान्यत्र वक्ष्यन्ते दक्षिणाधक् कर-क्रमात्॥ ११॥

अक्षमाला च कमलं बाणोऽसिक् कुलिशं गदा।
चक्रं त्रिशूलं परशुश् शङ्खो घण्टा च पाशकः॥ १२॥

शक्तिर्-दण्डश्-चर्म चापं पानपात्रं कमण्डलुः।
अलङ्-कृत-भुजा-मेभि-रायुधैक् कमला-सनाम्॥ १३॥

सर्वदेव-मयी-मीशां महालक्ष्मी-मिमां नृप।
पूजयेत्-सर्व-लोकानां स देवानां प्रभुर्-भवेत्॥

गौरी-देहात्-समुद्-भूता या सत्वैक-गुणाश्रया।

साक्षात्-सरस्वती प्रोक्ता शुम्भासुर-निबर्-हिणी॥ १५॥

दधौ चाष्ट-भुजा बाण-मुसले शूल-चक्र-भृत्।
शङ्खं घण्टां लाङ्गलं च कार्मुकं वसुधा-धिप॥ १६॥

एषा सम्पूजिता भक्त्या सर्व-ज्ञत्वं प्रयच्छति।
निशुम्भ-मथिनी देवी शुम्भासुर- निबर्-हिणी॥ १७॥

इत्-युक्तानि स्वरूपाणि मूर्तीनां तव पार्थिव।
उपासनं जगन्-मातुफ् पृथ-गासां निशामय॥ १८॥

महालक्ष्मीर्-यदा पूज्या महाकाली सरस्वती।
दक्षिणोत्-तरयोफ् पूज्ये पृष्ठतो मिथुन-त्रयम्॥ १९॥

विरिञ्चिस् स्वरया मध्ये रुद्रो गौर्या च दक्षिणे।
वामे लक्ष्म्या हृषीकेशप् पुरतो देवता-त्रयम्॥ २०॥

अष्टा-दश-भुजा मध्ये वामे चास्या दशानना।
दक्षिणे-ऽष्टभुजा लक्ष्मीर्-मह-तीति समर्चयेत्॥२१॥

अष्टदश-भुजा चैषा यदा पूज्या नराधिप।
दशानना-चाष्टभुजा दक्षिणोत्-तरयोस्-तदा॥ २२॥

काल-मृत्यू च सम्-पूज्यौ सर्वारिष्ट-प्रशान्तये।
यदा-चाष्टभुजा पूज्या शुम्भासुर-निबर्-हणी॥ २३॥

नवास्याश् शक्त्यफ् पूज्यास्-तदा रुद्र-विनायकौ।
नमो देव्या इति स्तोत्रैर्-महालक्ष्मीं समर्चयेत्॥ २४॥

अवतार-त्रयार्-चायां स्तोत्र-मन्त्रास्-तदा-श्रयाः।
अष्ट-दशभुजा चैषा पूज्या महिष-मर्दिनी॥ २५॥

महालक्ष्मीर्-महाकाली सैव प्रोक्ता सरस्वती।
ईश्वरी पुण्य-पापानां सर्वलोक-महेश्वरी ॥

महिषान्त-करी-येन पूजिता स जगत्-प्रभुः।
पूजयेज्-जगतां धात्रीं चण्डिकां भक्त-वत्सलाम्॥ २७॥

अर्घ्या-दिभि-रलङ्कारैर्-गन्ध-पुष्पैस्-तथाक्षतैः।
धूपैर्-दीपैश्च नैवेध्यैर्-नाना-भक्ष्य-समन्वितैः॥ २८॥

रुधि-रात्केन बलिना माम्सेन सुरया नृप।
प्रणा-माच-मनीयेन चन्दनेन सुगन्धिना॥

सकर्-पूरैश्च ताम्बूलैर्-भक्ति-भाव-समन्वितैः।

वाम-भागेऽग्रतो देव्याश्-छिन्न-शीर्षं महासुरम्॥ ३०॥

पूजयेन्-महिषं येन प्राप्तं सायुज्य-मीशया।
दक्षिणे पुरतस् सिम्हं समग्रं धर्म-मीश्वरम्॥ ३१॥

वाहनं पूजयेद्-देव्या धृतं येन चराचरम्।
कुर्याच्च स्तवनं धीमांस्-तस्या एकाग्र-मानसः॥ ३२॥

ततक् कृताञ्जलिर्-भूत्वा स्तुवीत चरितै-रिमैः।
एकेन वा मध्यमेन नैके-नेतर-योरिह॥ ३३॥

चरि-तार्धं तु न जपेज्-जपञ्-छिद्रम-वाप्-नुयात्।।
प्रदक्षिणा-नमस्कारान् कृत्वा मूर्ध्नि कृताञ्जलिः॥३४॥

क्षमा-पयेज्-जगद्-धात्रीं मुहुर्-मुहुर-तन्द्रितः।
प्राप्ति-श्लोकं च जुहुयात्-पायसं तिल-सर्-पिषा॥ ३५॥

जुहुयात्-स्तोत्र-मन्त्रैर्-वा चण्डिकायै शुभं हविः।
भूयो नाम-पदैर्-देवीं पूजयेत्-सु-समाहितः॥ ३६॥

प्रयतफ् प्राञ्जलिफ् प्रह्वफ् प्रणम्या-रोप्य चात्मनि।
सुचिरं भावये-दीशां चण्डिकां तन्मयो भवेत्॥ ३७॥

एवं यफ् पूजयेद्-भक्त्या प्रत्यहं परमेश्वरीम्।
भुक्त्वा भोगान् यथाकामं देवी-सायुज्य-माप्नुयात्॥३८॥

यो न पूजयते नित्यं चण्डिकां भक्त-वत्सलाम्।
भस्मी-कृत्यास्य पुण्यानि निर्दहेत्-परमेश्वरी॥ ३९॥

तस्मात्-पूजय भूपाल सर्वलोक-महेश्वरीम्।
यथोक्तेन विधानेन चण्डिकां सुख-माप्-स्यसि॥ ४०॥

## मूर्तिरहस्यम्

ऋषिरुवाच।

ॐ नन्दा भगवती नाम या भविष्यति नन्दजा।
स्तुता सा पूजिता भक्त्या वशी-कुर्याज्-जगत्त्रयम् ॥ २ ॥

कन-कोत्तम-कान्तिस् सा सुकान्ति-कनकाम्बरा।
देवी कनक-वर्णाभा कनकोत्तम-भूषणा॥

कमलाङ्कुश-पाशाब्जै-रलङ्-कृत-चतुर्-भुजा।
इन्दिरा कमला लक्ष्मीस् सा श्री रुक्माम्-बुजासना॥ ४ ॥

या रक्त-दन्तिका नाम देवी प्रोक्ता मयानघ।
तस्यास् स्वरूपं वक्ष्यामि शृणु सर्व-भयापहम्॥ ५ ॥

रक्ताम्बरा रक्त-वर्णा रक्त-सर्वाङ्ग-भूषणा।
रक्ता-युधा रक्त-नेत्रा रक्त-केशाति-भीषणा॥६ ॥

रक्त-तीक्ष्ण-नखा रक्त-दशना रक्त-दन्तिका।
पतिं नारी-वानु-रक्ता देवी भक्तं भजेज्-जनम्॥ ७ ॥

वसुधेव विशाला सा सुमेरु-युग-लस्तनी।
दीर्घौ लम्बा-वति-स्थूलौ तावतीव मनोहरौ॥

कर्क-शावति-कान्तौ तौ सर्वा-नन्द-पयो-निधी।
भक्तान् सम्पाय-येद्-देवी सर्व-काम-दुधौ स्थनौ॥ ९ ॥

खङ्गं पात्रं च मुसलं लाङ्गलं च बिभर्ति सा
आख्याता रक्त-चामुण्डा देवी योगेश्-श्वरीति च॥ १० ॥

अनया व्याप्त-मखिलं जगत्-स्थावर-जङ्गमम्।
इमां यप् पूजयेद्-भक्त्या स व्याप्नोति चराचरं॥ ११ ॥

अधीते य इमां नित्यं रक्त-दन्त्या वपुस्-स्तवम्।

तं सा परि-चरेद्-देवी पतिं प्रिय-मिवाङ्गना॥१२ ॥

शाकम्भरी नीलवर्णा नीलोत्पल-विलोचना।
गम्भीर-नाभिस्-त्रिवली-विभूषित-तनूदरी॥१३ ॥

सुकर्-कश-समोत्-तुङ्ग-वृत्त-पीन-घनस्तनी।
मुष्टिं शिली-मुखा-पूर्णं कमलं कमला-लया॥

पुष्प-पल्लव-मूलादि-फलाढ्यं शाक-सञ्चयम्।
काम्या-नन्तर-सैर्-युक्तं क्षुत्-तृण्-मृत्यु-भया-पहम् ॥१५ ॥

कार्मुकं च स्फुरत्-कान्ति बिभ्रती परमेश्वरी।
शाकम्भरी शताक्षी सा सैव दुर्गा प्रकीर्-तिता॥ १६ ॥

विशोका दुष्ट-दमनी शमनी दुरिता-पदाम्।
उमा गौरी सती चण्डी कालिका सा च पार्वती॥

शाकम्भरी स्तुवन् -ध्यायञ्-जपन् सम्पूजयन्-नमन्
अक्षय्य-मश्-नुते शीघ्र-मन्न-पाना-मृतं फलम्॥ १८ ॥

भीमापि नीलवर्णा सा दंष्ट्रा-दशन-भासुरा।
विशाल-लोचना नारी वृत्त-पीन-पयोधरा॥ १९ ॥

चन्द्रहासं च डमरुं शिरफ् पात्रं च बिभ्रती।
एकवीरा काल-रात्रिस् सैवोक्ता कामदा स्तुता॥२० ॥

तेजो-मण्डल-दुर्धर्षा भ्रामरी चित्र-कान्ति-भृत्।
चित्रानु-लेपना देवी चित्रा-भरण-भूषिता॥२१ ॥

चित्र-भ्रमर-पाणिस् सा महा-मारीति गीयते।
इत्येता मूर्तयो देव्या याख् ख्याता वसुधा-धिप॥२२ ॥

जगन्मातुश्-चण्डिकायाक् कीर्ति-ताक् काम-धेनवः।
इदं रहस्यं परमं न वाच्यं कस्य-चित्वया॥ २३ ॥

व्याख्यानं दिव्य-मूर्तीना-मभीष्ट-फल-दायकम्।
तस्मात् सर्व-प्रयत्नेन देवीं जप निरन्तरम्॥ २४ ॥

सप्त-जन्मार्-जितैर्-घोरैर्-ब्रह्म-हत्या-समैरपि।
पाठ-मात्रेण मन्त्राणां मुच्यते सर्व-किल्-बिषैः॥२५ ॥

देव्या ध्यानं मया ख्यातं गुह्याद् गुह्यतरं महत्।
तस्मात् सर्व-प्रयत्नेन सर्वकाम-फलप्रदम्॥ २६ ॥

सर्व-रूप-मयी देवी सर्व देवीमयं जगत्।

अतोऽहं विश्व-रूपां तां नमामि परमेश्वरीम्॥

## क्षमा प्रार्थना

अपराध-सहस्राणि क्रियन्ते-ऽहर्निशं मया।
दासोऽयमिति मां मत्वा क्षमस्व परमेश्वरि॥ १॥

आवाहनं न जानामि न जानामि विसर्जनम्।
पूजां चैव न जानामि क्षम्यतां परमेश्वरि॥ २॥

मन्त्रहीनं क्रियहीनं भक्तिहीनं सुरेश्वरि।
यत्पूजितं मया देवि परिपूर्णं तदस्तु मे॥ ३॥

अपराधशतं कृत्वा जगदम्बेति चोच्चरेत्।
यां गतिं समवाप्नोति न तां ब्रह्मादयस् सुराः॥ ४॥

सापराधोऽस्मि शरणं प्राप्तस्त्वां जगदम्बिके।
इदानी-मनुकम्प्योऽहं यथेच्छसि तथा कुरु॥ ५॥

अज्ञानाद्-विस्मृतेर्-भ्रान्त्या यन्न्यून-मधिकं कृतम्।
तत्सर्वं क्षम्यतां देवि प्रसीद परमेश्वरि॥ ६॥

कामेश्वरि जगन्मातस् सच्चिदा-नन्द-विग्रहे।
गृहाणार्-चामि-मां प्रीत्या प्रसीद परमेश्वरि॥ ७॥

गुह्याति-गुह्य-गोप्त्री त्वं गृहाणास्-मत्-कृतं जपम्।
सिद्धिर्-भवतु मे देवि त्वत्-प्रसादात्-सुरेश्वरि॥

श्रीदुर्गार्पणमस्तु॥